ज्येष्ठमासः
वर्षम् –६७
अष्टमोऽङ्कः
विक्रमाब्दः २०७३
युगाब्दः ५११८
५ जून २०१६

ISSN 2249-698X

# भारती

## संस्कृत-मासपत्रिका

एकस्याः प्रतेः
१५/–
वार्षिक–शुल्कम्
१२०/–
आजीवनसदस्यता
१५००/–



मातृभूमौ स्वराज्याय सततं युद्धतत्परः।
महाराणाप्रतापोऽयं प्रतापो भारतावनेः॥

## विषय-सूची


| क्र.सं. | विषयाः | निबन्धकाराः | पृष्ठ-संख्या |
|---|---|---|---|
| १ | मङ्गलाचरणम् | श्री प्यारेमोहनशर्मा | ३ |
| २ | मासावतरणम् | श्री प्यारेमोहनशर्मा | ३ |
| ३ | सम्पादकीयम् | श्री प्यारेमोहनशर्मा | ४ |
| ४ | ललितरसगङ्गाधरमणिः | प्रो. सुरेन्द्रकुमारशर्मा | ६ |
| ५ | पुस्तकसमीक्षा | म.म. देवर्षिकलानाथशास्त्री | १५ |
| ६ | राष्ट्रीय-शब्दस्य पाणिनीयता निर्बाधा | डॉ. रामशंकरभट्टाचार्यः | १८ |
| ७ | बाबासाहेबआप्टे महोदयानां व्यक्तित्ववर्णने- | वेणीमाधव गो. धर्माधिकारी | २० |
| ८ | सिद्धान्तस्य प्रश्नः | मा. श्रीमती आराधना धर्माधिकारी | २१ |
| ९ | भारतीमञ्जुनिकुञ्जम् | डॉ. रामनारायण झा | २२ |
| १० | यज्ञीयमन्त्रव्याख्या | पं. रामनारायण शास्त्री | २४ |
| ११ | 'अग्निर्वैश्वकर्मणः स्वर्देवेषु नो दधत्' | श्रीमती सुरचना त्रिवेदी | २६ |
| १२ | उत्थानवानेव सदा जयी स्यात् | डॉ. राजेश्वरी भट्टः | २९ |
| १३ | आयुर्वेद स्तम्भः | प्रो. बनवारीलालगौडः | ३१ |
| १४ | संस्कृतसमाचाराः | प्रधान सम्पादकः | ३५ |


### पाठकेभ्यो निवेदनम्

संस्कृतसुधियः पाठकाः निवेद्यन्ते यद् भारत्यां प्रकाशिताः शोधलेखाः, सामयिकनिबन्धाः, कविताः, कथाः, विनोदवार्ताः, लघुनाट्यकृत्यादयो भवद्भ्यः कथं रोचन्ते ? स्वविचारयुक्तपत्राणि निम्नलिखितसङ्केतोपरि संप्रेष्यानुगृह्णन्तु- **सम्पादक, 'भारती' संस्कृतमासिक, भारतीभवन, बी-15, न्यू कॉलोनी, जयपुर-302001**

**दूरभाषः 0141-2379014, मो. 9783105699**

**(धनादेश/चैक/ड्राफ्ट केवल ''भारती'' के नाम से ही भेजें- प्रबन्ध सम्पादक)**



।। श्रीशः ।।

ISSN2249-689X

# भारती

संस्कृत-मासपत्रिका



**प्रमुखसंरक्षकाः**
जगद्गुरवो निम्बार्कपीठाचार्याः श्रीराधासर्वेश्वरशरणदेवाचार्याः,

**प्रमुखसंरक्षकाः**
जगद्गुरुशङ्कराचार्यस्वामिश्रीजयेन्द्रसरस्वतीमहाभागाः

**प्रेरणास्रोतः**
स्व. परमाचार्यः
श्रीचन्द्रशेखरेन्द्रसरस्वतीमहाभागः

संस्थापकौ
स्व. उमाकान्तकेशवआप्टे
( बाबा साहब आप्टे )
स्व. श्रीगिरिराजशास्त्री ( दादाभाई )

संरक्षकाः
स्वामी विश्वेशतीर्थः
स्वामी सत्यमित्रानन्दगिरिः
स्वामी रामभद्राचार्यः
आचार्यः अविचलदासः
स्वामी विद्यानन्दसरस्वती

प्रधानसम्पादकः
देवर्षिकलानाथशास्त्री

सम्पादकः
प्यारेमोहनशर्मा

प्रबन्धसम्पादकः
सुदामा शर्मा

सहसम्पादकाः
प्रो. सुरेन्द्रकुमारशर्मा
शिवशरणनाथत्रिपाठी
डॉ. शिवचरणशर्मा

आर्थिकपरामर्शदाता
ओ.पी. गोयल

पृष्ठसंयोजनम्
श्याम प्रिन्टर्स, 22 गोदाम, जयपुरम्
rajeshksharma69@gmail.com - 01414001974

## मङ्गलाचरणम्

शुभ्रैरूर्मिभिरुच्छलद्गतिमती भागीरथी सेवते,
भाले यस्य विराजते शशिकला वक्षःस्थले व्यालराट्।
उत्सङ्गे च नगाधिराजतनया प्राणप्रिया पार्वती,
व्याघ्रस्याम्बरधारिणं पशुपतिं वन्दामहे तं शिवम्।।

## मासावतरणम्

गङ्गापूजनमाचरन्ति विबुधा ज्येष्ठे दशम्यां तिथौ,
मन्त्रोच्चारणपूर्वकं नतिपराः पूजन्ति ते जाह्नवीम्।
शुक्रे यान्ति सिते दले च सुधियो द्वारं हरेः श्रेयसे,
जाह्नव्याः सलिलं सदैव मधुरं ज्येष्ठेऽपि यत् शीतलम्।।

कार्यालयः
बी-15, भारतीभवनम्
न्यू कॉलोनी, जयपुरम् ( राज. )
ई-मेल sanskritbharti09@gmail.com

ज्येष्ठमासः
वर्षम् 67

विक्रमाब्दः 2073
जून, 2016

अङ्कः - 8

पञ्चवार्षिकशुल्कम् 500/-
वार्षिकशुल्कम् 120/- आजीवनसदस्यताशुल्कम् 1500/- रूप्यकाणि

( राजस्थानसंस्कृत-अकादम्या आर्थिकसहयोगेन प्रकाशिता )

## सम्पादकीयम्

# भ्रष्टाचारनिरोधका युवानः

...✍ पं. प्यारेमोहनशर्मा

भगवता कृष्णेन कथितं ''सर्वस्य चाहं हृदि सन्निविष्टः'' कृष्णः कथयति ''ममैवांशो जीवलोके जीवभूतः सनातनः'' परन्तु वयं न जानीमः, अतः अस्माकं हृदि प्रसुप्तं तं जागरितं कुर्वन्तु। भ्रष्टासुरेभ्यः समाजरक्षायै। अयमेवैकः पन्था विद्यते। अद्य भारतं लुण्ठाकाः लुण्ठन्ति वैदेशिकनिवेशव्याजेन भारतं परायत्तं कुर्वन्ति सर्वकाराः। भूमिं निजसम्पदं मत्वा दुह्यन्ति जनाः। वृक्षाः छिद्यन्ते पर्यावरणरक्षणस्य च वार्तां कुर्वन्ति। अत एव वर्षा विलुप्ता। पक्षिणामाश्रयभूताः पादपाः सम्प्रति लुप्तप्रायाः। पक्षिणो न सन्ति परन्तु लोकाः ''परीण्डा'' जलपात्राणि तेषां कृते बध्नन्ति।

अतो युवकाः जागृयुः। समाचारपत्राणि प्रत्यहं प्रतिपादयन्ति भ्रष्टाचारं निरोद्धुं न्यायपालिका असमर्था जातेति। विधायिकाकार्यपालिकयोस्तु ग्रन्थिबन्धनं संजातम्। अतः उभयोः सम्मेलनेन भ्रष्टाचारः प्रत्यहं वर्धते। इदमपि सत्यं यत् केचन न्यायाधीशा अपि धनमभिलषन्ति तथा केचन सुन्दरं शरीरमभिलषन्ति। परन्तु पुनरपि अधिकांशा न्यायाधीशाः अद्यापि सामाजिकं राष्ट्रियं च हितं चिन्तयित्वा निर्णयं कुर्वन्ति। निर्वाचिताः सर्वकाराः सामन्तवद् व्यवहरन्ति। भोगेष्वाकण्ठं निमग्नाः सन्ति। महान्तमप्यपराधिनं सर्वकारास्त्रातुं यतन्ते। यतोहि भ्रष्टाचारतः प्राप्तधनस्य विशालो भागः उपरि गच्छति। यदि अशोकसिंघवी-दण्ड्यते तर्हि तदीयस्तापः अन्यान् अपि सन्तापयिष्यति। अतस्तस्य संरक्षणमेव जनहिते वर्तते।

व्यापं ''मध्यप्रदेशे'' ''सलवाजुडुम'' छत्तीसगढे नक्सलवादिभ्यः संघर्षः, ''कोयला घोटाला'' यदि सार्वजनिकरूपेण सत्यस्वरूपे समुपस्थिता जायन्ते तर्हि किम् उच्चाधिकारिणः सुरक्षिताः स्थास्यन्ति। प्रत्येकस्मिन् प्रदेशे सहस्रशो भ्रष्टाचारासुराः विराजन्ते किं युवकाः मूकदर्शकाः सन्तो गणनामात्रं विधास्यन्ति किं युवकानां रक्तं नोष्माणं प्राप्नोति? युवकाः विचारयेयुः नैषा अवस्था (आयुः) पुनरायास्यति इदमेव-आयुः किञ्चित् कर्तुं प्रेरणां प्रयच्छति। जाग्रतु भवन्तः। देशप्रदेशेभ्यः किञ्चित् कर्तुं संकल्पं कुर्वन्तु। ये बाधकाः सम्मुखे सामायास्यन्ति तान् दण्डेन सत्कर्तुं समुद्यता भवन्तु। भ्रष्टाचारिणं दण्डयितुं नैके प्रकाराः विद्यन्ते तेष्वेकोऽयमपि वर्तते भ्रष्टाचारिणः सामाजिकं बहिष्कारं कुर्वन्तु। स्यान्नाम स भवत्क्षेत्रस्य विधायको मन्त्री वा। सर्वोच्चन्यायालयः टिप्पणीमकरोत्- यदि भ्रष्टाचाराधारेण सर्वकारान् निलम्बितान् कर्तुं निर्णयं कुर्मः तदा तु न कोऽप्यवशिष्यते।

भ्रष्टाचरणलिप्ता अपि नाद्यावधि दण्डिताः संजातास्तत्र कारणमिदं न्यायालयाः सीम्नि संकुचिताः विद्यन्ते। सीमानं केवलं युवकाः जनताश्च लङ्घितुं शक्नुवन्ति। युवका अग्रेसरा भवेयुः।

अत्रैकमुदाहरणं प्रस्तूयते। कल्पनां कुर्वन्तु। न्यायालयो व्यापकं जनहितं चिन्तयित्वा रामगढ-बन्धमादाय निर्णयं प्रयच्छेत् यत् रामगढबन्धस्य-जलापूर्तिक्षेत्रे ये बाधकाः लघुजलाशया आरामा भवनानि च विद्यन्ते तेषां सर्वेषां विध्वंसो विधेयः। आज्ञां पालयिष्यन्ति किं सर्वकारा अधिकारिणश्च। सर्वे इदमपि

जानन्ति यदधिकांशरूपेणातिक्रमणं नेतृभिरधिकारिभि-मैश्चव विहितम्। तेषामेवेङ्गितेन सर्वमिदं संजातम्। अधुना तदतिक्रमणं को विध्वंसयिष्यति। परन्तु न्यायालयसम्मुखे येन केन प्रकारेणाज्ञा पालितेति सूचनां प्रस्तोष्यन्ति। अत्र कार्यमस्माकं भवतो अर्थात् जनतायाश्च विद्यते यत् जनता सत्यं न्यायालयसम्मुखे उपस्थापयेत्। कियन्तो विध्वंसिताः कियन्तोऽवशिष्टाः इति पूर्णरूपेण सप्रमाणं न्यायालये न्यायाधीशसम्मुखे समुपस्थापयेत्। न्यायालयस्य प्रत्येकस्यादेशस्य पालनाविषये जनता युवानः सर्वदा जागरूकाः भवेयुः। सर्वत्र न्यायालया-देशपालना जाता न वेति जनता सावधानतया पश्येत्। सम्पूर्णदेशे जनता स्वकीयमुत्तरदायित्वं ज्ञात्वा न्यायादेशपालना विषये न्यायाधीशान् सूचयेत् तदैव न्यायपालिकाया आदेशाः पालिता भविष्यन्ति। यदि सप्रमाणं न्यायालयादेशावमाननायाः प्रमाणानि न्यायालये प्राप्तानि भवेयुस्तदा तु न्यायालयः सर्वकारान् अधिका-रिणश्चावमाननादण्डेन दण्डयिष्यति। प्रत्येकस्मिन् विषये जागरूकताया आवश्यकता विद्यते। अधिकारिणः कर्मचारिणश्च यदा अनुभविष्यन्ति यत्तेषां प्रत्येकं कार्यं कश्चन निरीक्षते तदा ते सावधानाः सन्तो न्यायालया-देशान् पालयिष्यन्ति।

इत्थमेव भवतां सम्मुखे भ्रष्टाचरणस्य किमपि कार्यं समागच्छेत् तदा सप्रमाणं तद्विषये मुख्यन्यायाधीशाय पत्रं प्रेषयन्तु यदि आवश्यकं स्यात् तर्हि तद्विषये समाचार-पत्रेभ्योऽपि सूचयन्तु। समाचारपत्राणि तदा स्वीयेन कार्येण न्यायालयाय शक्तिं प्रदास्यन्ति। यदि कश्चन असत्यानि प्रमाणानि प्रस्तूय अपराधमुक्तो भवेत् भवतां पार्श्वे च प्रमाणानि स्युस्तर्हि तत्कालमेव पत्रं न्यायाधीशाय लिखन्तु। भवन्तो युवावस्थामुपभुञ्जन्ति मनोरञ्जने आनन्दमनुभवन्ति कश्मीरस्य शोभाविलोकनानन्दाय परिवारसहिताः भ्रमन्ति तर्हि सर्वमिदं परित्यज्य युवावस्थायाः सदुपयोगेन देशं भ्रष्टाचरणान्मुक्तं विधातुं सततं सयत्ना भवन्तु। नेदमायुः पुनरायास्यति। न च वृद्धावस्थायां किमपि कर्तुं शक्ष्यन्ति। अतः स्वरक्तेनास्याः क्रान्तेः – इतिहासं लिखन्तु।

देशस्य भविष्यत्कालो युष्माकं विद्यते। भवन्तः कर्णधारा भविष्यन्ति। अग्रे यत्किमपि श्रेष्ठमश्रेष्ठं वा भविष्यति तत् सर्वं भवन्त एव भोक्ष्यन्ति। सप्ततिवर्षाणि व्यतीतानि। भारतं स्वतन्त्रं संजातम्। परन्तु जनता जलाभावे तृषिता वर्तते। धनाढ्याः स्वभवनेषु तरणताले तरन्ति उद्यानानि च जलेन सिञ्चन्ति। परन्तु साधारणो जनः पातुमपि जलं न प्राप्नोति। देशस्यार्धा जनता दीनता-रेखातोऽपि अधस्था वर्तते। एतेन विधायिकाकार्य-पालिकयोः सत्यं स्वरूपं सर्वेषां सम्मुखे समायाति। एतेन प्रतीयते न विधायिका न च कार्यपालिका साधारणजनानां विषये चिन्तिता विद्येते।

अधुना आशायाः किरणभूताः युवका एव वर्तन्ते। ग्रामे ग्रामे युवकानां दलानि निर्मापयितव्यानि। आधुनिकोपकरणैः सूचनां संगृह्य समाचारपत्रेषु प्रकाशितं समाचारं सप्रमाणं निरीक्ष्य भ्रष्टाचरणसूचनां न्यायालया-देशावमाननादिकं च शीघ्रं न्यायालये तद्विषयिणी सूचना प्रदेया। समाचारपत्राणि सर्वदा भवद्भिः प्रदत्तां सूचनां प्रकाशयिष्यन्ति। अनया रीत्या भवन्तो युवकाः देशं भ्रष्टाचरणमुक्तं कर्तुं समर्थाः सन्ति। ईश्वरोऽपि तस्मै साहाय्यं प्रयच्छति यः सत्यनिष्ठया स्वकर्म विदधाति।

व्यक्तिगतजीवने पावित्र्येण समग्रतया च व्यक्तिः परिचीयते। सार्वजनिकजीवने अन्येभ्योऽपि चिन्तन-मावश्यकम्। मदीयव्यवहारेण कोऽप्याहतो नो भवेदिति सदैव चिन्तनीयम्। यदि वयं दुष्टाय गालिं प्रदास्यामस्तर्हि न तत्र किमप्यन्तरमायाति अस्माकमेव जिह्वा दूषिता भवति। न कस्यापि भाग्यं परिवर्तयितुं सक्षमाः। अत एव कर्तव्यं पालयेयुः।

**पुरानी बस्ती, जयपुर**

# ललितरसगङ्गाधरमणिः

❏ प्रो. सुरेन्द्रकुमारशर्मा

सुविदितमेतत् समीक्षैकधियां विदुषां यत् रसगङ्गाधरोऽलङ्कारशास्त्रपाथोनिधिमन्थनोत्थ एकोऽनुपमोऽमूल्यो मणिः। अस्य प्रकाशनाय नास्ति परतः प्रकाशस्य काऽप्यावश्यकता। सुविशदस्य प्रकाशपुञ्जस्यास्य मणेरालोके सुतरामभिभासते निखिलालङ्कारशास्त्रतत्त्वनिकषः करामलकवत् तत्त्वविदां विदुषां पुरतः। एतादृशस्य अलङ्कारशास्त्रतत्त्वसमीक्षणपरस्य ग्रन्थस्य माहात्म्यं प्रतिपादयति प्रथमतया स्वयं ग्रन्थकारः पण्डितराज इति लब्धोपाधिको विपश्चिदपश्चिमः स्वयं जगन्नाथ एव ग्रन्था दौ। तद्यथा–

**निमग्नेन क्लेशैर्मननजलधेरन्तरुदरं,**
**मयोन्नीतो लोके ललितरसगङ्गाधरमणिः।**
**हरन्नन्तर्ध्वान्तं हृदयमधिरूढो गुणवताम्,**
**अलङ्कारान् सर्वानपि गलितगर्वान् रचयतु।।**
**प्रथमाननम्-4।। इति।।**

अत्र अधीतिबोधाचरणप्रचारणैरिति हर्षस्योक्तिमनुसरता पूर्वस्मिन् पद्ये स्वात्मनो गुरुप्रसादलब्धविद्यासमृद्धिं सूचयित्वा तासां विद्यानां बोधरूपमननमेव जलधित्वेनोपपाद्य तस्य मननरूपजलधेः उदरमध्ये बहुक्लेशपूर्वकं नितरां मननेन मया जगन्नाथेन आलङ्कारिकजगति एष रगङ्गाधररूपो ललितो मणिः उद्धृत इति प्रतिपादयति स्वयं पण्डितराजः। एतेन प्रतिपाद्यते यत् पण्डितराजेन पूर्वाचायैः प्रतिपादितानामलङ्कारशास्त्रीयतत्त्वानां युक्तिप्रमाणादिना अनुचिन्तनरूपं गभीरं समीक्षणं तदन्तस्तलस्पर्शिचिन्तनञ्च विधाय एष रसगङ्गाधरः प्रबन्धस्तद्विद्याप्रचारणपरत्वेन विरचितः। एष च रसगङ्गाधरमणिर्गुणग्राहिणां विदुषामलङ्कारशास्त्रविषयकमन्तर्ध्वान्तमपाकुर्वन् तेषां हृदयग्राह्यतया हृदयमधिरूढः सन् सर्वानलङ्कारशास्त्रप्रतिपादकान् सिद्धान्तग्रन्थान् गलितगर्वान् सम्पादयत्विति। एवं स्वयमेव पण्डितराजेन ग्रन्थस्यास्यालङ्कारशास्त्रीयतत्त्वानां स्फुटतया तत्त्वार्थप्रतिभासकत्वेन मणित्वं प्रतिपादितम्। परकीयेभ्यः प्राचीनालङ्कारतत्त्वप्रतिपादकेभ्यो ग्रन्थेभ्यः अनेन रसगङ्गाधरस्योत्कृष्टत्वमपि स्वत एवोपपन्नं भवति।

न केवलमेतावदेवोक्त्वा विरमति पण्डितराजः, अपितु अग्रिमे पद्ये स्वात्मनः प्रबन्धस्य भाविन्यप्यलङ्कारशास्त्रतत्त्वं परिष्कुर्वद्भिः प्रतिभाशालिभिर्विद्वद्भिर्विरच्यमानैः ग्रन्थान्तरैरप्यगतार्थत्वस्य प्रतिपादने न मनागपि सङ्कोचमावहति सः। तद्यथा–

**परिष्कुर्वन्त्वर्थान् सहृदयधुरीणाः कतिपये,**
**तथापि क्लेशो मे कथमपि गतार्थो न भविता।**
**तिमीन्द्राः सङक्षोभं विदधतु पयोधेः पुनरिमे,**
**किमेतेनायासो भवति विफलो मन्दरगिरेः।।**
**प्रथमाननम्-5।।**

**एवमब्धिर्लङ्घित एव वानरभटैः किन्त्वस्यगम्भीरतामापातालनिमग्नपीवरतनुर्जानाति मन्थाचलः** इत्युक्ते-र्भावानुरोधेन, प्राचीनवीनानाञ्चाचार्याणां पदार्थानां तत्त्वतो ज्ञाने, नूतनस्य पदार्थस्य परिष्करणे तथा च तत्तत्पदार्थानां रसगङ्गाधरानुरूपपरिष्कारेऽपि सर्वथा असामर्थ्यप्रदर्शननपरेण पण्डितराजेन रसगङ्गाधरस्य प्रणयने जातस्यात्मनः क्लेशस्यागतार्थत्वमुपादेयत्वञ्चाप्युपपादितम्।

एवं रसगङ्गाधरस्य तात्त्विकः परिचयस्तु पण्डितराजेन स्वत एव ग्रन्थादौ प्रस्तुतः। पुनरपि एतत्प्रकाश एव किमपि समीक्षणीयमितिधिया विचिन्त्यते

यत् ''**सङ्गीतमथ साहित्यं सरस्वत्याः स्तनद्वयम्। एक-मापातमधुरमन्यदालोचनामृतम्**'' इत्युक्त्या साहित्यं नाम आलोचनामृतम्। किञ्चानेन काव्यीय-तत्त्वानां समालोचनं समीक्षणमेव वा अस्यालङ्कार-शास्त्रस्य प्राणभूतं तत्त्वमिति प्रतिपद्यते। अतः अलङ्कार-शास्त्रीयतत्त्वविमर्शकेषु ग्रन्थेषु काव्यीयपदार्थानाम् उत्कृष्टतापकृष्टतयोस्तारतम्यं विवेचयितुमेतत् प्राथम्येन समीक्षणीयं भवति, यत् कस्यापि तत्सम्बद्धस्य ग्रन्थस्य समालोचनपद्धतिः समीक्षणपद्धतिर्वा कियती पदार्थान्तस्तलमर्मस्पर्शिनी गहनमर्मप्रकाशिनी चास्ति। अनया दृशा समीक्षणे सम्यक् प्रतिभाति यत् नाट्यशास्त्रप्रणेतुर्भरतमुनेः समारभ्य, अथवा भाम-हाचार्यादारभ्य पण्डितराजजगन्नाथस्य पूर्ववर्तिभिराचार्यैः काव्यस्य जीवातुभूतानि गुणदोषालङ्काररीतिवृत्ति-रसादीनि तत्त्वानि सिद्धान्ततया प्रतिष्ठापितानि स्व-स्व-ग्रन्थेषु प्रायशस्तान्येव तत्त्वानि पण्डितराजेनापि प्रतिपादितानि किन्तु पूर्वप्रतिष्ठापितानां तेषां स्वरूप निरूपणे काव्यीयतत्त्वानामव्याप्त्यतिव्याप्त्यादि-दोषपरिहारद्वारा यादृशः पदार्थान्तस्तलमर्मस्पर्शी परिष्कारः नव्यन्यायशैल्यां पण्डितराजेन रसगङ्गाधरे संविहितः, यत्र मनागपि शङ्काया अवसर एव नोत्पद्येत तादृशो नान्यत्र क्वापि दृग्गोचरी भवति।

पूर्वाचार्याणां ग्रन्थेषु यत् तत्त्वप्रतिपादनं पद्यशैल्यां-कारिकामाध्यमेन प्रतिपद्यते, तत्र स्वल्पैरेव शब्दैः तत्तत् पदार्थस्य समासेन स्वरूपनिरूपणं कृतमस्ति। तस्य पदार्थस्य तादृक्स्वरूपनिरूपणे कदाचित् अव्याप्तिरति-व्याप्तिरर्थान्तरकल्पनासन्देहादिसदृशाः ये दोषाः सम्भाविता यदि भवेयुस्तन्निराकरणे तत्र तत्र ग्रन्थेषु प्राचीनाचार्याणां न कश्चित् तादृशः प्रयासाभिनिवेशो दृश्यते। रसगङ्गाधरे पण्डितराजस्य एवंविधसम्भावितानां समस्तदोषाणां निराकरणाय तादृशोऽभिनिवेशो दृश्यते यत्र तत्तत्पदार्थतत्त्वावगमे सन्देहस्य लेशमात्रमपि सहृदयानां विदुषां कृते न जायेत।

तत्र पूर्वपक्षस्थापनमाध्यमेन बहुधा विकल्प्य तत्र तत्र तत्तत्सम्भाविता सर्वविधा आशङ्काः स्वकीयानुपमया तार्किकप्रतिभया एवं निराकृताः, येन कस्यापि काव्यतत्त्वजिज्ञासोः सहृदयस्य हृदि तद्विषयिणी काप्याशङ्काकुरितैव न स्यात्।

एतदप्यत्र विशिष्टं महत्त्वाधायकं तथ्यं यदेकतः प्राक्तनानां मम्मटप्रमुखाणामाचार्याणां सिद्धान्तग्रन्थेषु का-व्यीयपदार्थानां कारिकामाध्यमेन स्वमतानुरूपं स्वरूपनिरूपणं विधाय उदाहरणपद्यानि अन्यान्य-काव्येभ्यः सङ्गृहीर्धातानि सन्ति। साहित्यदर्पण-कारेण विश्वनाथेन यत्र तत्र ''इदं मम'' इत्युक्त्वा कानिचित् पद्यानि स्वयं निर्माय उदाहृतानि सन्ति, परं सर्वत्र लक्षणेषु तादृशी स्थितिः नैव दृग्गोचरी भवति। किन्त्वपरतः पण्डितराजेन-

**निर्माय नूतनमुदाहरणानुरूपं,**<br>**काव्यं मयाऽत्र निहितं न परस्य किञ्चित्।**<br>**किं सेव्यते सुमनसां मनसाऽपि गन्धः,**<br>**कस्तूरिकाजननशक्तिभृता मृगेण।। प्रथमाननम् 6।।**

इति ग्रन्थादावेव प्रतिज्ञाय सर्वाण्यप्युदाहरणानि स्वनिर्मितान्येव रसगङ्गाधरे प्रस्तुतानि। काव्यीयतत्त्वानां लक्षणं विधाय पुनस्तदनुरूपमेवोदाहरणं निर्मितं, येन लक्षणं क्वापि लक्ष्ये व्यभिचरितं न स्यात्। प्राक्तनैराचार्यैः अन्यान्यग्रन्थेषु समुपलब्धानि पद्यानि स्वप्रबन्धेषू-दाहरणरूपेण यानि सङ्गृहीतानि, तानि न जाने तत्काव्यकर्त्रा बुद्धौ किमात्मकं प्रसङ्गं निधाय विरचितानि आसन्। तत्रात्मप्रबन्धे तेषामुदाहरणपद्यानां कियन्मात्रं समन्वयो भवति, लक्षणन्तत्र सम्यगन्वेति न वेति तत्त्वतः समीक्षणमविधाय तान्युपन्यस्तानि। एतेन लक्षणव्यभि-चरणाशङ्का सर्वथा निर्मूलेति निश्चयेन न वक्तुं शक्यते।

रसगङ्गाधरे तु पण्डितराजेन स्वनिर्मितान्येव उदाहरण-पद्यानि तत्तत्त्वलक्षणं प्राक् परिष्कृत्य तदनुरूपाञ्च निर्मितिं विधायैवोपन्यस्तानीति तत्र लक्षणव्यभिचरणाशङ्को-दयावसर एव नैव सम्भवति। अत एतदपि तथ्यं रसगङ्गाधरं विशेषयति ग्रन्थान्तरेभ्य इति निर्वि-चिकित्सितम्। यत्र तत्र ''इदं पुनर्नोदाहार्यम्'' इति कृत्वा प्रत्युदाहरणमाध्यमेनापि तत्त्वार्थसम्पोषणं पण्डितराजेन कृतमिति स्वनिर्मितोदाहरणतयैव सम्भवं जातम्। एतानि स्वनिर्मितोदाहरणानि सर्वांशे लक्षणैः सह सङ्गतानि भवन्ति। जिज्ञासूनां व्युत्पत्तये च एषा प्रत्युदाहरणानां प्रस्तुतिः सम्यक् प्रभवति।

प्राक्तनाचार्याणामेतत् परकीयोदाहरणोपन्यसनं तदसङ्गततया च नैकत्राक्षिपति पण्डितराजः। दिङ्मात्रं तदुदाह्रियतेऽत्र प्रसङ्गे। यथा वैदर्भीरीतिसन्दर्भे ''अस्याश्च रीतेर्निर्माणे कविना नितरामवहितेन भाव्यम्, अन्यथा परिपाकभङ्गः स्यात्। यथामरुक-कविपद्ये''- इति कृत्वा उदाहृतं पद्यम्-

**शून्यं वासगृहं विलोक्य शयनादुत्थाय किंचिच्छनै-**
**र्निद्राव्याजमुपागतस्य सुचिरं निर्वर्ण्य पत्युर्मुखम्।**
**विस्रब्धं परिचुम्ब्य जातपुलकामालोक्य गण्डस्थलीं,**
**लज्जानम्रमुखी प्रियेण हसता बाला चिरं चुम्बिता।।**

सुविदितमेव तत्रभवतां भवतां विपश्चितां यत् मम्मट-प्रमुखैः आचार्यैः प्रायः एतदेव पद्यं शृङ्गाररसस्यो-दाहरणतया प्रस्तुतमस्ति। माधुर्यगुणाभिव्यञ्जिका रचनैव शृङ्गाररसस्यानुकूला भवतीति समेषामाचार्याणां सम्मतिः। मधुररसेषु दीर्घसमासस्य झयघटितसंयोगपर-ह्रस्वस्य रेफहकारान्यतरघटितसंयोगस्य शर्भिन्नमहा-प्राणघटितसंयोगस्य इत्यादिरूपाणां रचनानां वर्जना भवति।

अत्र शृङ्गाररसोदाहरणरूपे पद्ये ''**उत्थाय किंचिच्छनैः**'' अत्र नैकट्येन सवर्णझयद्वयस्य संयोगः अपि च ''**शनैर्निद्रा**'', ''**निर्वर्ण्य**'', ''**पत्युर्मुखम्**'' इत्यादि स्थलेषु रेफघटितसंयोगस्य, ''**विस्रब्धम्**'' इत्यत्र महाप्राणघटितस्य- ''**लज्जा**'' इत्यत्र सवर्णझ-यद्वयघटित संयोगस्य अपि च नैकत्र झय्घटितसंयोग-परह्रस्य स्थितिर्दृश्यते। इत्यादीनि नैकस्थलानि माधुर्य-रचनाप्रतिकूलानि सन्ति। परन्तेषामाचार्याणां कीदृशी विवशतेयं यत् एतदेवा पद्यं प्रायशः उदाहरन्ति। पण्डितराजश्च ''**एतादृशः प्रयोगः कवेर्निर्माणसामग्री-दारिद्र्यं प्रकाशयति**'' इत्युक्त्वा न केवलममरूक-कविमेवाक्षिपति, अपितु ताँस्तानाचार्यानप्युपहसति व्याजेनानेन यैः शृङ्गाररसत्वेनोदाहृतं पद्यमिदम्। इदन्तु केवलं निदर्शनीभूतमेकमुदाहरणम्। स्थले स्थले एता-दृशान्यनेकान्युदाहरणानि अनयैव दृशा समालोचितानि पण्डितराजेन यत्र तत्तदाचार्याणां विवशता प्रकटिता भवति। एतद्विपरीतं रसगङ्गाधरे एतादृशी काचित् विवशता न प्रतीयते यतोहि तत्र तु तत्तद्रसादितत्स्वरू-पानुकूलमेव उदाहरणानि विरचय्योपन्यस्तानि यत्र किञ्चिदपि नैयून्यस्य सम्भावनैव नोदेति। अतएव पण्डितराजो निर्विवादं निर्भयतया च सगौरवं समुद्घोषयितुं प्रभवति ''**निर्माय नूतनमुदाहरणा-नुरूपमिति।**''

अस्तु नाम, यत्र अन्ये प्राक्तना आचार्याः काव्यसिद्धान्तानां विषये प्रचलितां प्राचीनपम्पराम-नुरुध्यैव प्रायशः यत्किञ्चिन्नाममात्रं परिवर्तनं विधाय काव्यसिद्धान्तान् प्रतिपादयन्ति। परं ''**तातस्य कूपोऽयमिति ब्रुवाणाः क्षारं जलं कापुरुषाः पिबन्ति**'' इत्यन्धपरम्परामात्रं पण्डितराजः क्वापि नानुसरति। रसगङ्गाधरे निरूपितात् काव्यस्वरूपादेवारभ्य ग्रन्थान्तं यावत् पश्यामो वयं यत् पण्डितराजः तत्तत्सिद्धान्तान् परिष्कारपूर्वकमेवाङ्गीकरोति, न तु ''**यथा पूर्वमकल्पयदिति**'' धिया एवं वक्तुं शक्यते

यत्तेषां प्रचलितसिद्धान्तानां तथा पुनर्मूल्याङ्कनं विहितं परिष्कारदृशा पण्डितराजेन येन तत्तत्सिद्धान्तानां नूतनाविर्भाव एव कश्चित् परिलक्षितो भवति रसगङ्गाधरे। इतः पूर्वं कस्याप्यन्यस्याचार्यस्य सिद्धान्तानामेतेषां पारम्परिकाणां परिष्करणाभि-निवेशात्मकः कश्चिदभिनवोपक्रमः परिलक्षितो न भवतीति सुविदितमेव विदुषाम्। तद्यथा दिङ्मात्रमत्र प्रस्तोतुमुपक्रमे –

तत्रादौ काव्यस्वरूपनिरूपण एव द्रष्टव्यम्। तत्र पूर्वाचार्याः भामहादयः '**शब्दार्थौ काव्यम्**' इति स्वीकुर्वन्ति, यस्य चरमा परिणतिः ''**तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि**'' इति मम्मटोक्त-काव्यलक्षणे दृश्यते यत्काव्यलक्षणं प्रायशः समेषामादर्शभूतमजायत। यद्यपि ''**शरीरं तावदिष्टार्थ-व्यवच्छिन्ना पदावलिः**'' इत्याचार्यस्य दण्डिनः ''**वाक्यं रसात्मकं काव्यम्**'' इति च विश्वनाथस्य काव्यलक्षणे शब्दस्वरूपकाव्यस्य बीजमुपन्यस्तं दृश्यते। यद्यपि विश्वनाथः ''**सगुणौ सालङ्कारौ**'' इत्यादि मम्मटोक्तकाव्यस्वरूपांशविषयकं साहित्यदर्पणे वैयर्थ्यं प्रतिपादमितुमुपक्रमते तथापि तत्राचार्यस्य वादपक्ष-स्तादृशः प्रबलो नास्ति यादृशस्तत्रापेक्षितोऽभूत्। एवं शब्दार्थोभयस्य काव्यत्वपक्षः पण्डितराजपूर्वमधिकः प्रचलित आसीत्।

परं पण्डितराजस्तत्र केवलं शब्दरूपकाव्यत्वमिति पक्षस्य परिष्करणाय संरम्भेण संकल्पितो दृश्यते। अतः स्वकाव्यस्वरूपनिरूपणे गुणदोषालङ्कारादीनामभिनिवेशं परित्यज्य, शब्दार्थयोः काव्यत्वमनङ्गीकृत्य शब्दमात्रस्य काव्यत्वं प्रतिपादयन् सर्वथा परिष्कृतं काव्यस्वरूपं निरूपयति– ''**रमणीयार्थप्रतिपादकः शब्दः काव्यम्**'' इति।

एतत् पण्डितराजाभिमतं सामान्यं काव्यलक्षणं, यस्याभिप्रायः केवलं रमणीयार्थस्य प्रतिपादकः शब्दः काव्यमित्यस्ति। यद्यपि ''**शरीरं तावदिष्टार्थव्यच्छन्ना पदावली**'' इति दण्डिनः काव्यलक्षणं पण्डितराजस्य प्रसङ्गेऽस्मिन् प्रेरणा स्रोतस्त्वेन मन्तुं शक्यते, परं गभीर-विवेचनानन्तरं प्रतिपद्यते यत् पण्डितराजस्य काव्यविषयिणी शब्दनिष्ठेयं विशिष्टता तादृशीं पूर्वोक्तां शब्दनिष्ठामपि विशिष्टतामतिशेते। अतः केवलं ''**रमणीयार्थप्रतिपादकः शब्दः काव्यम्**'' इत्येव काव्यलक्षणं विधाय पण्डितराजो नैव विश्राम्यति, अपितु का नाम रमणीयता इत्यपि प्रतिपादयति। न केवलमेतावदेवापि चैतत् सामान्यलक्षणानन्तरं परिष्कृतलक्षणं फलितलक्षणमपि नव्यन्यायशैल्यां प्रतिपाद्य एकमेव काव्यलक्षणमुत्तरोत्तरं परिष्कृत्य त्रिधा तथा कथितं यथा तत्र मनागपि व्यभिचरितत्वं न संस्पृशेत्। तत्र प्रथमं का नाम सा रमणीयता या पण्डितराजेनार्थस्य विशेषणत्वेनात्र लक्षणे प्रदर्शिता, इत्याशङ्कायां अवसरमदत्वैव पण्डितराजः रमणीयतास्वरूपं निरूपयन्नाह–

''**रमणीयता च लोकोत्तराह्लादजनकज्ञान-गोचरता**'' इति। अर्थात् यत्रालौकिकस्याह्लादस्योपल-ब्धिः स्यात्तत्रैव तिष्ठति रमणीयतेति। तात्पर्यमस्ति यदलौकिकस्याह्लादस्य जनकं यज्ज्ञानं तस्यैव ज्ञानस्य विषयीभूतो योऽर्थस्तस्यैव धर्मो रमणीयता कथ्यते। एवमेषा ज्ञानगोचरता लोकोत्तरमाह्लादं जनयति। वक्तुं शक्यते यदयं रमणीयार्थश्चमत्कारी आह्लाद एवास्ति। पण्डितराज अत्रैव प्रसङ्गप्राप्तं लोकोत्तरत्वमपि विशदयति–

''**लोकोत्तरत्वं चाह्लादगतश्चमत्कारत्वापर-पर्यायोऽनुभवसाक्षिको जातिविशेषः**'' इति। अपि च एष लोकोत्तरश्चमत्कारः कुत उत्पद्यते इत्याकाङ्क्षामपि पण्डितराज अत्रैव समादधाति– ''**कारणं च तदवच्छिन्ने**

**भावनाविशेषः पुनः पुनरनुसन्धानात्मा**'' इति कृत्वा अस्य लोकोत्तराह्लादस्य जनकत्वे पुनः पुनरनुसन्धान-रूपस्य भावनाविशेषस्यैव कारणता निर्दिष्टा पण्डित-राजेनेति।

एवं पण्डितराजस्यानेन प्रतिपादनेन सामान्यभाषा-शब्दाः शास्त्रान्तरीयाः शब्दाश्च केवलमर्थमात्रं प्रतिपादयन्ति, अत्राभिप्रेताः काव्यशब्दाश्च रमणीयार्थमेव प्रतिपादयन्तीति सम्यक् प्रतिपद्यते। तदेवं सामान्य-शब्देभ्यः काव्यशब्दानां वैलक्षण्यमपि सुतरां प्रतिपद्यते। अपि च चमत्कारत्वापरपर्यायभूतं सहृदयानामनुभव-साक्षिकं लोकोत्तरत्वं स्वत एव चमत्कारशून्यस्यानुकूल-वेदनीयस्य लौकिकाह्लादस्य व्यावर्तनं करोति। एवं चमत्कृतिपूर्णस्याह्लादस्य समर्पकाणामर्थानां प्रतिपादकः शब्दः काव्यमिति साधु सङ्गच्छते। एवं सामान्यलक्षणं प्रतिपाद्य त्रिधा परिष्कृतं लक्षणमपि प्रस्तौति पण्डितराजः-

''**इत्थं चमत्कारजनकभावनाविषयार्थप्रति-पादक शब्दत्वं (काव्यत्वम्)**'', ''**यत्प्रतिपा-दितार्थविषयक भावनात्वं चमत्कारजनकता-वच्छेदकं तत्त्वं (काव्यत्वम्)**'' ''**स्वविशिष्ट-जनकताऽवच्छेदकार्थ प्रतिपादकतासंसर्गेण चमत्कारत्ववत्त्वमेव वा काव्यत्वमिति फलितम्**'' इति।

अत्र प्रथमपरिष्कारे चमत्कारोत्पादयित्र्याः भावनायाः विषयीभूतस्यार्थस्य प्रतिपादकस्य शब्दस्य काव्य-त्वमुक्तम्। पुनश्च द्वितीये परिष्कारे प्रतिलोमपद्धत्या येन शब्देन प्रतिपादितस्य अर्थस्य सकलाऽपि भावना चमत्कारजनि का भवति, सः शब्दः काव्यमित्युक्तं भवति। ततश्च तृतीयं फलितलक्षणं यत्र स्वशब्देन चमत्कारत्वस्य ग्रहणं भवति, तदेवं चमत्कारत्वविशिष्टो चमत्कारस्तस्य जनकता, या भावनायां तिष्ठति सा भावनानिष्ठा जनकता तस्या विषयतासम्बन्धेन अवच्छेदको योऽर्थस्तस्यार्थस्य प्रतिपादकतासम्बन्धेन चमत्कारत्वविशिष्टशब्दत्वमेव काव्यत्वमिति। एवं परिष्कृतयोः लक्षणयोः शैली अनुलोमप्रतिलोमात्मिका यत्र दृश्यते तत्रैव फलित-लक्षणस्य शैली वर्तुलिता अस्तीति विदुषां मतम्। यत्र चमत्कारत्वादारभ्य लक्षणं चमत्कार एव पर्यवसितमस्ति। अस्मिन् फलितलक्षणे शब्दस्य तु नामापि न गृहीतम्। ''**रसे सारश्चमत्कारः**'' इति धिया आत्मतत्त्वमेवात्र चमत्कारत्वमेव समालोचितं प्रतिभाति। अत्र तु ''अर्थे प्रतिपादकता- संसर्गेण चमत्कारत्वमेव काव्यत्वं फलितम्। यद्यपि एतत् चमत्कारत्वमर्थप्रतिपादकतासंसर्गेण शब्देऽपि सम्भवति। अत इदमपि नाशङ्कनीयं यत् पण्डितराजेन फलितलक्षणे शब्दः कथं विस्मृतः एषाऽस्ति स्थूलस्वरूपतः सूक्ष्मस्वरूपं प्रति परिणतिः। एतादृशोऽस्ति विदुषां निष्कर्षः। एषा परिष्कारात्मिका तत्त्वप्रतिपादिका शैली केवलं रसगङ्गाधर एव पण्डितराजस्य परिलक्ष्यते नान्येषां केषांञ्चिदाचार्याणां तत्तद्ग्रन्थेष्विति सुविदितं विदुषाम्। एतदनितरसाधारणं वैशिष्ट्यं रसगङ्गाधरस्य निर्विचिकित्सं प्रतिभाति।

एवमेव काव्यकारणताप्रसङ्गेऽपि प्राचीनाचार्येषु मतैक्यं न दृश्यते। केचन दण्डिरुद्रटमम्मटादयः समुदितकारणतावादिनः सन्ति, केचन वामनादयः ''**कवित्वबीजं प्रतिभानम्**'' इति केवलं प्रतिभा-वादिनोऽपि सन्ति। पण्डितराजोऽपि केवलं प्रतिभावादी आचार्य अस्ति। पण्डितराजेन प्रतिभास्वरूपमपि समालोचितं ''**तस्य च कारणं कविगता केवला प्रतिभा। सा च काव्यघटनानुकूलशब्दार्थोपस्थितिः। तद्गतं च प्रतिभात्वं काव्यकारणतावच्छेदकतया सिद्धो जातिविशेष उपाधिरूपं वा खण्डम्**'' इति। एवं काव्य रचनावसरे कवेः मस्तिष्के उचितशब्दा-

र्थोपस्थितिः पण्डितराजमते प्रतिभा कथ्यते। तत्रापि प्रतिभागतं यत् प्रतिभात्वं तदेव काव्यकारणतावच्छेदकमस्तीति पण्डितराजस्याभिमतम्। तत् प्रतिभात्वञ्च जातिविशेषः। जातित्वेन तत् प्रतिभात्वं विविधिरूपासु प्रतिभासु प्रतिभारूपामेकाकारां प्रतीतिं कारयति। अस्याः प्रतिभायाः अपि ''**तस्याश्च हेतुः क्वचिद्देवतामहापुरुषप्रसादादिजन्यमदृष्टं, क्वचिच्च विलक्षणव्युत्पतिकाव्य करणाभ्यासौ न तु त्रयमेव**'' इतिकृत्वा प्रतिभायां हेतुद्वयस्य निर्देशः पण्डितराजेन विहितः। एकस्तत्रादृष्टरूपः, अन्यश्च व्युत्पत्यभ्यासरूपः। अत्रापि जायमानाः बह्वी आशङ्काः उपस्थाप्य निराकृताः पण्डितराजेन। अतश्चात्रापि रसगङ्गाधरस्य वैशिष्ट्यं स्वीकरणीयमेव।

अग्रेऽपि यत्र प्राक्तनाचार्या उत्तममध्यमाधमत्वेन प्रायशः त्रयो भेदाः काव्यस्य स्वीकुर्वन्ति। केचन ध्वनिगुणीभूतव्यङ्ग्यत्वेन भेदद्वयमेव स्वीकुर्वन्ति, पण्डितराजेन ''**तच्चोत्तमोत्तमोत्तममध्यमाधमभेदाच्चतुर्धा**'' इति कृत्वा काव्यस्य भेदचतुष्टय प्रतिपादितम्तत्राधमाधमरूपस्य पञ्चमस्य काव्यप्रकारस्यापि सम्भावनां समुद्भाव्य निराकृतवान् पण्डितराजः। अपि च भेदत्रयवादिनोऽपि पराहतास्तत्र ''**केचिदिमानपि चतुरो भेदानगणयन्त उत्तममध्यमाधमभावेन त्रिविधमेव काव्यमाचक्षते। तत्रार्थचित्रशब्दचित्रयोरविशेषेणाध-मत्वमयुक्तं वक्तुम्। तारतम्यस्य स्फुटमुपलब्धेः।**'' इत्यादिद्वारा एवं भेदचतुष्टयस्योपादेयता अपि प्रतिपादिता। इदमपि वैशिष्ट्यं रसगङ्गाधरस्यैव।

अन्यच्च पूर्वाचार्यपरम्परा यत्र रसादिध्वनिमसंलक्ष्यक्रमव्यङ्ग्यान्तर्गतं स्वीकरोति तत्रैव पण्डितराजो रसादिध्वनिमकान्तत असंलक्ष्यक्रमव्यङ्ग्यान्तर्गतं न मनुते, अपितु विचारवेद्ये प्रकरणे यत्र विभावादीनां प्रतीतिर्लक्ष्यते तत्र संलक्ष्यक्रमव्यङ्ग्यान्तर्गतमपि मनुते । तत्राभिधामूलस्य ध्वनेः वस्त्वलङ्कारभेदौ, लक्षणामूलस्य ध्वनेरपि अर्थान्तरसंक्रमितवाच्यात्यन्ततिरस्कृतवाच्याख्य भेदद्वयमपि पण्डितराजः संलक्ष्यक्रमव्यङ्ग्यत्वेनैव स्वीकरोति।

एवमेव संलक्ष्यक्रमव्यङ्ग्यध्वनेर्यत्र आचार्यो मम्मटः ''**शब्दशक्तिमूलकस्य ध्वनेर्वस्त्वलङ्कार-रूपत्वात् द्वयोश्चानयोः पदवाक्यगतत्वात् चत्वारः भेदाः अर्थशक्तिमूलकस्य च ध्वनेः, वस्त्वलङ्काररूपध्वनेः स्वतः सम्भवीकविप्रौढोक्ति-कविनिबद्धवक्तृप्रौढोक्तिगतत्वात् द्वादश तेषामपि पदवाक्यप्रबन्धगतत्वात् षट्त्रिंशत् भेदाः। ततश्च शब्दार्थोभयशक्त्युत्थध्वने एकः भेदः**'' एवमाहत्य एकचत्वारिंशत् भेदान् स्वीकरोति। एतद्विपरीतं पण्डितराजः शब्दशक्तिमूलकस्य भेदद्वयमेव स्वीकरोति। इति तद्भेदान्तराप्रतिपादनेन प्रतिभाति। पण्डितराजः अर्थशक्तिमूलकस्य अष्टावेव भेदान् स्वीकरोति। सः कविनिबद्धवक्तृप्रौढोक्तिरूपं भेदं पृथक्तया नैव स्वीकरोति।

प्रतिभानिर्वर्तित्वाविशेषाच्च कवि- तदुम्यितवक्तृप्रौढोक्तिनिष्पन्नयरर्थयोर्न पृथक् भावेन गणनोचिता इति कृत्वा कविनिबद्धवक्तृमाध्यमेन यत् प्रस्तूयते तदपि कविकल्पितमेव भवतीति तस्य परित्यागो युक्तिसम्मतः। एवं पण्डितराज, अभिधामूलकस्य ध्वनेरेकादशभेदान् लक्षणामूलकस्य भेदद्वयम्, असंलक्ष्यक्रमव्यङ्ग्यध्वनेश्चैकं भेदमाहत्य चतुर्दशभेदान् स्वीकृत्यानावश्यकान् भेदान् निराकरोत्।

रसस्वरूपप्रसङ्गे अपि पूर्वाचार्यैः स्वाभिमतरसस्वरूपनिरूपणानन्तरं भरतोक्तरससूत्रव्याख्याने भट्टनायकभट्टलोल्लट-शङ्कुक-अभिनवगुप्तानां चतुर्णामाचार्याणां क्रमशः भुक्तिवाद-उत्पत्तिवाद-अनुमितिवाद-अभिव्यक्तिवादानां प्रस्तावना कृता। पण्डितराजेन तु

एकादशमतानि रसविषयकानि प्रस्तुतानि। न केवलं प्रस्तुतान्यपितु दार्शनिकपद्धत्या तादृशं गभीरं व्याख्यानं विश्लेषणात्मकं प्रस्तुतं यादृशमितः पूर्वं क्वापि न लभ्यते। उदाहरणतया मम्मटस्य व्यक्तिवादस्य सर्वथा नवीनमेव व्याख्यानं ''**व्यक्तिश्च भग्नावरणा चित्**'' इत्यात्मकं प्रस्तुतम्। ताटस्थ्येन ''**रसप्रतीतावना-स्वाद्यत्वम्**'' आत्मगतत्वेन च प्रत्ययो दुर्घटः इत्यादि द्वारा रसप्रतीतिविषयकसमस्यानां तार्किकं समाधानञ्च प्रस्तुतम्। रसस्वरूपनिरूपणे अभिनवगुप्तादयः प्राचीनाचार्याः केवलं सुमुचितललितसन्निवेशचारुणा काव्येन समर्पितैः सहृदयहृदयं प्रविष्टैस्तदीय-सहृदयतासहकृतेन भावनाविशेषमहिम्ना विगलित-दुष्यन्तरमणीत्वादिभिरलौकिक विभावानुभावव्यभि-चारिशब्दव्यपदेश्यैः शकुन्तलादिभिरालम्बन-कारणैरित्यादिभिरेतत् तूक्तं यत् भावनाविशेषमहिम्ना दुष्यन्तसम्बन्धं तिरोधाय कान्तात्वेनैव साधारणधर्मेण शकुन्तला सामाजिकानां हृदि विभाव्यते। अत्र रसचन्द्रिकाव्याख्याकारः पं. केदारनाथ ओझाः टीकते यत् ''**लौकिकशकुन्तला तु दुष्यन्तरतेर्विभावः कान्तात्वमात्रेण विभाव्यमाना शकुन्तला अलौकिकीसामाजिकरतेरपि योग्या विभावत्वस्ये-त्यादि** च एवं दृश्यते यत् प्राक्तनाचार्यैः कान्तात्वमात्रस्य विभावत्वे कान्तात्वमात्रेण भगिन्यादिषु सम्भाव्यमानं विभावत्वं कथं वारणीयं भविष्यतीत्यादि प्रकारकं चिन्तनं तत्समाधानञ्च न क्वापि प्रदर्शितम्। प्रत्युत पण्डितराजेन एतादृशं गभीरं चिन्तनं विधाय नव्यन्यायशैल्यां तस्यासन्दिग्धं तार्किकं समाधानं प्रस्तुतम्-

''**न च कान्तात्वं साधारणविभावताऽवच्छेद-कमत्राप्यस्तीति वाच्यम्, अप्रामाण्यनिश्चयाना लिङ्गिताऽगम्यात्वप्रकारकज्ञानविरहस्य विशेष्यता सम्बन्धावच्छिन्नप्रतियोगिताकस्य विभावताऽव-च्छेदककोटववश्यं निवेश्यत्वात्**'' इत्यादिद्वारा स्पष्टीकृतं यत् विशेष्यतासम्बन्धावच्छिन्नप्रतियोगिताकस्य अप्रामाण्य निश्चयानालिङ्गितागम्यात्वप्रकारकज्ञान-विरहस्य विभावतावच्छेदककोटौ अवश्यं निवेशः करणीयः अन्यथा स्वस्नादेरपि कान्तात्वादिना तत्त्वापत्तेः। एवं समग्रमपि प्रसंगोपात्तं विषयजातमसन्दिग्धतया परिष्कृत्यैव विशदतया प्रतिपादितं पण्डितराजेन रसगङ्गाधरे।

एवमेव करूणादीनां रसत्वमपि सयुक्तिकमुपपादितं रसगङ्गाधरे। अन्यच्चाप्यन्यत्रालङ्कारिकग्रन्थेषु दयादान-युद्धधर्मत्वेन चतुर्भेदो वीररसः प्रतिपादितो वर्तते, तत्रैव रसगङ्गाधरे सत्यवीर-पाण्डित्यवीर-क्षमावीर-बलवीर-त्वेनातिरिक्ततया चत्वारो भेदा अपि प्रतिपादिताः सन्ति।

अन्यच्चापि ''**ये रसस्याङ्गिनो धर्माः शौर्यादय इवात्मनस्ते गुणाः**''! इतिकृत्वा प्राचीनाचार्यैर्यत्र गुणाः रसमात्रस्य धर्मत्वेन प्रतिपादितास्तत्रैव पण्डितराजः गुणान् शब्दार्थरचनारसानां चतुर्णामपि धर्मत्वेन स्थिरीकृतवान् येऽमी माधुर्यौज प्रसादा रसमात्रधर्मतयोक्तास्तेषां रस धर्मत्वे किं मानमित्यादिना समारभ्य ''**प्रयोजकत्वं चादृष्टादिविलक्षणं शब्दार्थरसरचनामात्रमेव ग्राह्यमित्यन्तं यावत्**''। तत्रैव तत्तद्गुणानुरूपरचना-विषये वर्जनीय वर्णानामपि विश्लेषणं विशदतया यादृशो रसगङ्गाधरेप्रस्तुतं तादृशं नान्यत्रोपलभ्यते।

एवमेव भावध्वनेरपि स्वरूपपरिष्कार अपूर्व एव लक्ष्यते। तत्रापि व्यभिचारिभावानां लक्षणोदाहरणानि यत्र तत्र प्रत्युदाहरणान्यपि विस्तरेण सुविशदं किञ्चिदपूर्वमेव विवेचितानि रसगङ्गाधरे। एवमेव वृत्तिनिरूपणे अभिधालक्षणयोः स्वरूपप्रतिपादनं नव्यन्याय-परिष्कृतशैल्यां विहितम्। अलङ्काराणां समेषां पूर्वाचार्यापेक्षया परिष्कृतं मार्मिकं विशदं विवेचनं यादृशं रसगङ्गाधरे समुपलभ्यते तादृशं नान्यत्रानुभूयत इति।

विस्तरभयान्नाधिकं विवेचतमपेक्षते इति पिङ्मात्रं किञ्चिद् विमृष्टम्।

**रसगङ्गाधरस्य टीका :**- प्रायश अष्टौ टीकाः रसगङ्गाधरस्य समुपलभ्यन्ते -

**1. विषमपदी** - ग्रन्थस्यास्य सर्वतः प्राचीना टीका विषमपदी नाम्नी आसीत् यस्याः सङ्केतः नागेशभट्टस्य व्याख्याने समुपलभ्यते। अद्यापि सा टीका नोपलब्धा वर्तते।

**2. गुरुमर्मप्रकाशटीका**- सम्प्रति समुपलब्धासु रसगङ्गाधरस्य टीकासु परमवैय्याकरणस्य नागेशभट्टस्य गुरुमर्मप्रकाशनाम्नी टीका सर्वतः प्राचीना वर्तते। अस्याः टीकाया विषये एषा मान्यता विदुषां विद्यते यत् टीकेयं टिप्पणीरूपैवास्ति। यतोहि अस्याः साहाय्येन सामान्यो विद्वज्जनः ग्रन्थग्रन्थिस्फोरणे सामान्यतया काठिन्य-मनुभवति। टीकाकारस्य महद्दायित्वमस्ति यत्सः ग्रन्थकर्तुराशयमनुसृत्य तादृशं विशदं पदार्थविवेचनं कुर्यात् येन ग्रन्थतत्त्वावबोधे सामान्योऽपि जिज्ञासुः समर्थो भवेत्। एतादृशमाशयं परिलक्ष्यैव संस्कृतसाहित्ये ''टीका गुरूणां गुरु'' रित्युक्तिः प्रचलिता वर्तते। टीकादृशा गुरुमर्मप्रकाशिकायामेतत्सामर्थ्यं नैव प्रतिभाति। यतोहि पण्डितराजस्याशयं विशदीकर्तुं यावन्मात्रं व्याख्यानस्यावश्यकता आसीत् तावन्मात्रमत्र न परिलक्ष्यते। प्रत्युत यत्र तत्र प्रसङ्गेषु पण्डितराजस्य मूलसिद्धान्ता एव क्वचित् खण्डिताः दृश्यन्ते टीकायामस्याम्। यथा मम्मटोक्त-शब्दार्थोभयनिष्ठस्य काव्यस्य रसगङ्गाधरे आलोचनावसरे स्वयं टीकाकारः नागेशभट्टः पण्डितराजस्य युक्तीनां खण्डनं विधाय मम्मट मतमेव समर्थयते। प्राचीनतमत्वात् टीकाया अस्याः महत्त्वन्त्वस्त्येव, परं सामान्यजिज्ञासूनां तादृशः उपकारोऽनया न साधितः यादृशः टीकाऽपेक्षितो आसीदिति। परवर्तिटीकाकारेणभट्टमथुरानाथशास्त्रिणा स्वकीयभूमिकायां गुरुमर्मप्रकाशटीकायाः बहवो दोषाः समुद्घाटिताः सन्ति। नागेशभट्टटीका टीकापेक्षया आलोचना अधिकं प्रतीयते।

**3. सरलाटीका** - जयपुरवास्तव्यभट्टमथुरानाथशस्त्रिणा ग्रन्थस्यास्य सरलानाम्नी टीका विरचिता। नामानुरूपेयं टीका पाठकानां कृते महती उपकारिणी मन्यते। स्वयं भट्टमहोदयस्य टीकाविषये कथनं वर्तते यत् ग्रन्थे नव्यन्यायशैल्यां प्रस्तुतानां पदार्थानां यथाशक्ति स्पष्टीकरणाय ममायं प्रयासः। तादृशं तत्र प्रयतितमपि लक्ष्यते। यद्यपि नव्यन्यायपदावलीनां साक्षात् तत्पर्याय-वाचकैः शब्दैस्तं अर्थो नैव प्रोक्तस्तथापि शब्दान्तरैः तादृशीनां पदावलीनां स्पष्टीकरणाय तद्भावावबोधनार्थं सफलः प्रयासो भट्टमहोदयस्य तत्र लक्ष्यते। स्थले स्थले नागेशभट्टेनाक्षिप्तानां स्थलानां परिमार्जनमपि तत्र प्रस्तुतम्। रसगङ्गाधरस्य तत्त्वार्थावबोधनाय प्रयासोऽयं सरला-विषयकः श्लाघनीय इति वक्तुं शक्यते।

**4. हिन्दीटीका**- पं. पुरुषोत्तमचतुर्वेदिना रसगङ्गाधरस्य हिन्द्यां टीका प्रस्तुता। अस्याः टीकाया उद्देश्यं हिन्दीभाषाविदां सम्मुखे रसगङ्गाधरप्रतिपादितानां सिद्धान्तानामुपस्थापनमधिकं लक्ष्यते। हिन्द्यामनुवादोऽयं रसगङ्गाधरस्य संस्कृतभाषेतरालङ्कार-शास्त्रविदां सामान्यसंस्कृतज्ञानां तज्जिज्ञासूनां कृते महदुपकारक-त्वात् प्रशंसनीयोऽयं प्रयासः चतुर्वेदि-महोदयस्य। भट्टमथुरानाथशास्त्रिणा यद्यपि स्वभूमिकायां यत्र तत्र आलोचना अपि अस्यानुवादस्य कृता। हिन्दी व्याख्याकर्त्रा पं. मदनमोहनझा महोदयेनापि द्वित्रेषु स्थलेषु अस्यालोचना कृता, परं स्वहिन्दीव्याख्या-लेखने साहाय्यप्रदातृत्वादस्योपकारोऽपि स्वीकृतस्तेन हिन्दी भाषामाध्यमेन रसगङ्गाधरावबोधाय श्लाघनीयोऽयं प्रयासः चतुर्वेदिमहोदयस्येति।

**5. चन्द्रिकासंस्कृतहिन्दीटीका** - पं. बद्रीनाथझा-

महोदयेन विरचिता चन्द्रिकासंस्कृतव्याख्या प्रायशस्त-दनुगामिनी पं. मदनमोहनझामहोदयेन विरचिता हिन्दीटीका अपि चौखम्बाविद्याभवनवाराणसीतः प्रकाशिता। संस्कृतविदुषामध्यापकानां विद्यार्थिनाञ्च कृते ग्रन्थाभिप्रायं स्पष्टयितुं महदुपकारिणीयं चन्द्रिका संस्कृतहिन्दीटीका। प्रायशः पठन-पाठनं ग्रन्थस्यास्य चन्द्रिकाव्याख्यासाहाय्येन प्रचलितमस्ति इत्येवमस्याः व्याख्याया उपादेयता स्वत एव सिद्ध्यति। यद्यपि परवर्तिव्याख्यात्रा पं. केदारनाथओझा महोदयेन अस्या अपि आलोचना विहिता, तथापि ग्रन्थग्रन्थिस्फोरणे पदार्थनिरूपणे च महत् साहाय्यमस्याः टीकाया इति निर्विवादम्। पं. बद्रीनाथझामहोदयेन केवलं प्रथमाननस्यैव संस्कृतव्याख्या प्रस्तुता।

6. **मधुसूदनीटीका** – पं. मधुसूदनशास्त्रिणा विरचितेयं टीका काशी हिन्दूविश्वविद्यालयतः प्रकाशिता वर्तते। विस्तृतायामस्यां टीकायां नव्यन्यायपदावलीनां स्पष्टीकरणे टीकाकारस्य महान् प्रयासो लक्ष्यते। पं. केदारनाथओझामहोदयेन स्वात्मनः सतीर्थ्यः श्री मधुसूदनमिश्रगौडमहादेयः इति मत्वा ''**यच्चगुरोः सम्मुखं लक्षणं लिखितं तदेव शुद्धमन्यत्र न्यायशास्त्र- व्युत्पत्तिहीनस्य अनल्पं जल्पतोऽशुद्धिः स्वाभाविकी। काकतालीयन्यायेन क्वचिच्छुद्धिरपि संभवति, संशयस्तु सर्वं ग्रसति**'' इत्येवं कृत्वा समालोचितेयं टीका।

7. **रसचन्द्रिका** – पं. केदारनाथओझा महोदयेन विरचितेयं रसचन्द्रिकानाम्नी संस्कृतव्याख्या सम्पूर्णानन्द संस्कृतविश्वविद्यालयवाराणसीतः सरस्वतीभवन ग्रन्थ-मालान्तर्गतं तत्रत्यस्य डॉ. भारगीरथप्रसादत्रिपाठी-वागीश-शास्त्री-अनुसन्धानसंस्थान निदेशकस्य प्रधानसम्पादकत्वे 1977 तमे खैस्ताब्दे प्रकाशिताऽ भूत्। अस्याः व्याख्यायाः महत्त्वं स्वयमेव व्याख्याकारः प्रकटयति –

**निर्द्वेषा बहुशास्त्रसारसुषमां संल्लोकयन्तां हृदा,**
**वादप्रौढिमिहार्जयन्तु विरतालङ्कारतच्चन्द्रिकाम्।**
**म्लानिं प्राप यतश्च कौस्तुभयुतो मर्मप्रकाशोऽपि ताम्**
**विद्वांसो रसचन्द्रिकां सहृदयाः कुर्वन्तु सार्थां मुदा।।**

**विद्वन्महेन्द्रमहिमानमनुव्रजन्त्यां,**
**नैवाक्षिपन्तु कलुषं रसचन्द्रिकायाम्।**
**रत्नाकरस्य सरसां तरसा न किञ्चिद्**
**रूपं बिभर्ति गलितावयवं विनैव।।**

सुविशदेयं व्याख्या वादसामर्थ्याय प्रौढेरर्जनाय च प्रभवतीति निर्विवादम्। ग्रन्थोक्तपदार्थं सुविशदं स्फोरयतीयं व्याख्या। स्थले स्थले मर्मप्रकाश-सरला-चन्द्रिकादिव्याख्यागतां न्यूनतामसम्बद्धतामपि च घोषयति। विदुषां परममुपकारिणीयं व्याख्या विद्वद्भिः: सुभृशं समाद्रियते। ग्रन्थे नव्यन्यायशैल्यां प्रतिपादिताः पदार्थाः अपि व्याख्यायामस्यां सरलतया विशदीकृते इत्यलम्।

8. **चन्द्रकला**– चन्द्रकलानाम्नी काचित् टीका सम्पूर्णा-नन्दसंस्कृतविश्वविद्यालयवाराणसीत : प्रकाशिता श्रूयते।

एतदतिरिक्तं ''रसतरङ्गिणी'' संस्कृतहिन्दीव्याख्या श्रीनारायणमिश्रमहोदयेन विरचिता श्रीकृष्णदास-अकादमी वाराणसीतः, शिवनन्दिनीसंस्कृतहिन्दी-व्याख्या श्री रामाचार्यशर्मणा विरचिता भारतीयविद्या-भवनदिल्लीतः प्रकाशितेति लभ्यते। इत्यलं विस्तरेण।

**निदेशकचरः**
**राजस्थानसंस्कृतशिक्षाविभागस्य**
**सहसम्पादकः- भारतीपत्रिकाया**
**''श्रीनिलयनम्'' ए-277, महेशनगरम्, जयपुरम्**

पुस्तकसमीक्षा

❑ म.म. देवर्षिकलानाथशास्त्री

# आधुनिकसंस्कृतसाहित्यविवेचनम्

अस्माकमुपास्यायां निर्जरगिरायां नूतना साहित्य-सृष्टिरनवरतं प्रचलति, तस्याः समीक्षणमाकलन-मितिहासलेखनं चाऽपि निरन्तरं प्रवर्तते इति सुमहतो हर्षस्य विषयः। विंश्यां शताब्द्यां विलिखितस्य संस्कृतवाङ्मयस्येतिहासः 'संस्कृतवाङ्मय का बृहत् इतिहास' शीर्षकग्रन्थमालायाः सप्तमे खण्डे प्रकाशितः, ''बीसवीं सदी का संस्कृत साहित्य'' प्रभृतिग्रन्थेष्वपि तस्याऽऽकलनमकारि, अन्येष्वपि समीक्षाग्रन्थेषु, निबन्धसंग्रहेषु च नूतनसंस्कृतसाहित्येतिहासो व्यलेखि। एवंविध एको ग्रन्थः सपद्येव जयपुरात्प्रकाशमायातो यत्राऽऽधुनिकस्य सर्जनात्मकसंस्कृतसाहित्य-स्येतिहासलेखनं समीक्षणं च कुर्वाणाः 33 शोधनिबन्धाः संगृहीताः सन्ति ये आधुनिके साहित्ये युगबोधस्य, अभिनवशब्दप्रयोगस्य, नूतनविधानां, विश्वजनीन-फलकस्य, नूतनप्रवृत्तीनां च पृथक् पृथक् समीक्षणं कुर्वन्ति, कृतिविशेषानादाय तानपि विमृशन्ति। एतदतिरक्तं 8 प्रमुखसाहित्यकाराणां स्वकीयसाहित्य-यात्राविवरणं तेषामेव शब्देष्वप्यत्र संगृहीतम्।

प्रथममाधुनिकसंस्कृतसाहित्यस्य सामान्यप्रवृत्तयः शोधनिबन्धद्वये विमृष्टाः, एकस्मिन् निबन्धे राजस्थानी-यमाधुनिकसंस्कृतसाहित्यमपि वर्णितम्। इत्थं संकलनेऽस्मिन्नाधुनिकसंस्कृतसाहित्यस्य वैविध्यमयः परिचयोऽग्रणीत्वेन लेखनं कुर्वाणानां विदुषामाचार्याणां, विशेषज्ञानां च लेखनीभिः कारित इति विशेषोऽस्य स्फुटं प्रकटीभवति।

मूलतः 1987 ई. वर्षे जोधपुरविश्वविद्यालये संस्कृतविभागेन डॉ. दयानन्दभार्गववर्यस्य संयोजकत्वे या विद्वद्गोष्ठी आधुनिकसंस्कृतसाहित्यमाधृत्य समायोजिताऽभूत् तस्यां प्रस्तुता निबन्धा ग्रन्थे एकस्मिन् संगृहीता अभवन्, एतदनन्तरं गते काले त्रिषु वर्षदशकेषु यन्नूतनं दृश्यं समवालोकि संस्कृतसाहित्यजगता, तस्यापि विमर्शमावश्यकं मत्वा नूतना निबन्धा अपि सङ्कलिताः, तान् पूर्वनिबन्धैः सह संगृह्य, संशोध्य च सोऽयं संग्रहो नूत्नतया प्रकाशमानायितः। एतस्य प्रस्तावनायां सर्वा नूतना घटना अपि विमृष्टाः सन्ति, जनसंचारमाध्यमानां, पत्रकारितायाः, चलचित्राणां भूमिकाऽपि सूचितास्ति। के ग्रन्था आधुनिकसंस्कृतं विमृशन्ति तेषामपि सूचनो-पन्यस्ताऽस्ति। इत्थमाधुनिकसंस्कृतसाहित्यस्य पूर्णं परिचयं कारयत्ययं निबन्धसंग्रहः, डॉ. अभिराज-राजेन्द्रमिश्र-डॉ. हर्षदेवमाधव-डॉ. राधावल्लभत्रिपाठि प्रभृतीनामधिकारिलेखकानां लेखनी प्रस्तुतवती संग्रहेऽस्मिन् संकलितान् निबन्धानित्यपि पर्याप्तं प्रमाणयत्यस्य संकलनग्रन्थस्य प्रामाणिकताम्। डॉ. दयानन्दभार्गवोऽस्य सम्पादनस्य कृते सुतरां वर्धापन-मर्हति। अत्र 2 सम्पादकीयौ, एकं प्रतिवेदनं, 14 निबन्धाश्च संस्कृते, 19 हिन्द्यां सर्वान् विषयान् स्पष्टी-कुर्वन्ति।

**आधुनिकसंस्कृतसाहित्यः** सम्पा. म.म. डॉ. दयानन्दभार्गव, प्रका. हंसा प्रकाशन, 57, मिश्र राजाजी

का रास्ता, चांदपोल बाजार, जयपुर-पृ.सं. 300 मू. 600/-.

## नूतनयुगीनं संस्कृतसाहित्यम्

आधुनिके युगेऽपि गीर्वाणवाण्यां निरन्तरं साहित्य-सर्जनं प्रचलतीति सुविदितं विज्ञानाम्। पत्र-पत्रिकासु प्रकाश्यमानं साहित्यं वीक्ष्य पाठका आधुनिकसंस्कृत-साहित्येन परिचयं कर्तुं प्रभवन्ति, पाठ्यचर्यासु छात्रेभ्य-स्तावत्यां मात्रायां न पाठ्यते आधुनिकं साहित्यम्। महतो हर्षस्यायं विषयो यद् विश्वविद्यालयेषु संस्कृतविभागानां तत्त्वावधाने शोधोपाध्यादीनां कृते यदनुसन्धानं विधीयते तदन्तर्गतमाधुनिकस्य संस्कृतसाहित्यस्यानुसन्धानं विधाय तदुपरि शोधप्रबन्धप्रणयनमद्यापि सर्वत्र समाद्रियते। अत एवाधुनिकसंस्कृतसाहित्यस्य गभीरं पर्यवेक्षणं समीक्षणं च प्रचलति विश्वविद्यालयेषु। राजस्थाने गतशताब्दीभ्यः संस्कृतसर्जका अनवरतं काव्य-कथा-नाटकनिबन्धादिप्रणयनं सम्पादनमनुवादं वा कुर्वाणाः सन्ति। तादृशस्याधुनिकसंस्कृतसाहित्यस्य (राजस्थानीयस्य) सर्वाङ्गीणं सूक्ष्मं च समीक्षणं शोधोपाधये डॉ. कमलकान्तबालाणेन कृतमासीत् तदपि एकविंश शताब्द्याः सार्धदशके विलिखितमनूदितं सम्पादितं च नवीनतमसाहित्यं लक्ष्यीकृत्य कृतमभूदतः समीक्षणमिदं गहनं सर्वाङ्गीणं च समपद्यत। शोधोपाधि-प्राप्त्यनन्तरमधुना ग्रन्थस्यास्य प्रकाशनमपि समजनि, लोकार्पणमपीत्यपरः प्रमोदविषयः।

ग्रन्थेऽस्मिन् लेखकेन-राजस्थाने एकविंश्यां शताब्द्यां लेखनं कुर्वाणानां विदुषां सम्पूर्णः परिचयः प्रथमतया कारितः।

तदनु विधानां वर्गीकरणं विधाय क्रमशो महाकाव्यानां, खण्डकाव्यानां, गद्यकाव्यानां, नाटककृतीनां च विधानुसारं परिचयः, समीक्षणं च समुपनिबद्धं पृथक् पृथक् खण्डेषु। पत्रपत्रिकासु प्रकाशिता मुक्तकरचना अपि साहित्यस्य बहुमूल्या सामग्री वर्तते।, सम्पादनमनुवादः, समीक्षणं चापि महत्त्वपूर्णमिति कृत्वा पृथक् पृथगध्यायेषु पत्रपत्रिकादिषु प्रकाशितस्य साहित्यस्यानुशीलनमपि प्रस्तुतं, तदनु सम्पादितानां प्राचीनग्रन्थानां परिचयस्तत्सम्पादकैः को विशेषस्तेषां सम्पादने परिदर्शित इत्यस्यापि विमर्शः समुपनिबद्धः। तदनन्तरं काव्यनाटकादीनां संस्कृते-ऽनुवादो हिन्दीतः सिन्धीतश्च केन कृत इत्यपि परिचायितम्। अन्ते च वर्षक्रमेण प्रतिवर्षं प्रकाशितानां ग्रन्थानां सूची मुद्रिता। इत्थं राजस्थानीयस्याधुनिक-संस्कृतसाहित्यस्य विलोडनं साधु सञ्जातमित्य-वगमिष्यन्ति पाठकाः। 24 प्रमुखसाहित्यकाराणां चित्राणि मुखपृष्ठे मुद्रितानि दृष्ट्वाऽपि पाठकः परिचेष्यति राजस्थानीयसाहित्यकाराणामाधुनिकसहित्य-सुधाब्धे-र्विपुलं विलोडनं कृतं स्वानुसन्धानप्रवृत्तेन लेखकेन। एवं च सत्यनारायणशास्त्रिद्वयमारभ्य प्रवीण-पंड्यापर्यन्तं वयोवृद्धानारभ्य युवावर्धि साहित्यकारा अत्र विमृष्टा इत्येतत्कृते वर्धापयामो लेखकं डॉ. कमलकान्त-बालाणवर्यम्। जिज्ञासूनामनुसन्धातृणां परीक्षोन्मुखानां च सुभृशं मार्गदर्शनं करिष्यत्ययं ग्रन्थ इत्यपि विश्वसिमः।

[**एकविंशशताब्द्या राजस्थानस्य संस्कृतसाहित्यम्** ले. डॉ. कमलकान्त बालाण, प्रका. आइडियल पब्लिकेशन 580, मोतीसिंह भोमियों का रास्ता, जौहरी बाजार, जयपुर, पृ.सं. 272, मू. 350/-.]

## उपासना-शास्त्रग्रन्थः

सहस्राब्दीभ्यो निरन्तरं प्रवर्तमानस्य सनातनधर्मस्य देवकृत्यानां पूजाकार्याणां च सुमहती संख्या, सुमहान् फलकविस्तारश्चास्तीति विदन्त्येव विद्वांसः। वैष्णवाः, शैवाः, शाक्ताः, सर्वेऽपि दैनन्दिनकृत्यरूपेणापि देवाराधनं कुर्वन्ति, नैमित्तिककाम्यादिकृत्यरूपेणापि देवप्रतिष्ठा, षोडशोपचारपूजा, होमादीनि कार्याणि क्रियन्ते तैः। सर्वस्यास्य सुमहान् विधिविस्तारो यतो हि कर्मकाण्डेऽस्मिन् वैदिकमन्त्रा अपि प्रयुज्यन्ते, पौराणिकमन्त्रा अपि, नामस्मरणादिकार्येभ्यो नामावल्यः (सहस्रनामादीनि), माहात्म्यकथाः, सर्वमिदं सनातनधर्मिणां जीवने महत्त्वमावहति।

एवंविधानां सर्वेषां कर्मणां सप्रमाणं विधिविधानं, मन्त्रादिभिः सह, वास्तुशान्त्यादिसहकारिकृत्यविधिभिः सह विशाले एकस्मिन् ग्रन्थे संग्रहं कृत्वा सर्वत्र हिन्द्यनुवादसहकृतः सन्दर्भग्रन्थरूपो विधिविधानग्रन्थः सद्य एव प्रकाशमायात इति सुमहान् प्रमोदः। एतस्य प्रणेताऽस्ति सुप्रथितो युवकविः, राजस्थानसंस्कृत-अकादम्याः सर्वोच्चसम्मानस्य माघपुरस्काराख्यस्य विजेता पं. प्रवीणपंड्यावर्यः। अस्मिन् ग्रन्थे हेमाद्रि-संकल्पविधिमारभ्य गणपतिपूजन-पुण्याहवाचन-नान्दीश्राद्ध-वास्तुपूजा-कुण्डकर्म-नवग्रहपूजन-कुशकण्डिकादिविधिः प्रथमेऽध्याये, चण्डीयाग-रुद्रयाग विष्णुयागादीन्यग्निकार्याणि द्वितीयेऽध्याये, देप्रतिष्ठा-वास्तुहोम-नीराजनादि-विधानानि तृतीयेऽध्याये सविस्तरं समावेशितानि।

ग्रन्थस्यास्य विशेषोऽस्ति तत्तद्देवाराधनप्रसङ्गे तैः सम्बद्धस्य सम्पूर्णस्य साहित्यस्य समावेशः। यथा देवीभक्तानां कृते कवचार्गलाकीलकसहिता समस्ता दुर्गासप्तशती समाविष्टा, रुद्रोपासकानां कृते रुद्राष्टाध्यायी इत्यादयः। अयं केवलं धर्मशास्त्रग्रन्थो, वेदविधानग्रन्थो वा माभूत् ज्ञानविज्ञानादितत्त्वविवेचनमप्यत्र समावेश्येतेति विचिन्ता प्रवीणपंड्यावर्येण भूमिकाभागे वेदविज्ञान-वाक्यमालासन्दर्भेण पं. मधुसूदनओझामहाभागैः कथं वेदेषु विज्ञानतत्त्वचिन्तनमनुशीलितमिति हिन्द्यां स्पष्टीकुर्वाण आलेखोऽपि प्रारम्भे प्रस्तुत इति ग्रन्थस्यास्य सर्वसमावेशित्वं साधयति।

इत्थं हि विशालेऽस्मिन् ग्रन्थे वेद-पुराण-धर्मशास्त्र-कर्मकाण्ड-भक्तिमार्गादिधाराः संकलय्य विधिविधानादीनां विपुलो राशिः संगृहीत इत्येतत्कृते शतशो वर्धापनानि प्रेष्यन्ते पं. प्रवीणपंड्यावर्यस्य कृते। ग्रन्थस्य नामकरणं ''मधुपर्कः'' इति केवलं प्रतीकार्थं व्यनक्ति, अन्यथा ग्रन्थोऽयं मधोः समुद्र इव सिध्येदिति कामना लेखक-प्रकाशकादीनां स्यादित्यनुमीयते।

**मधुपर्कः**- प्रणेता- डॉ. प्रवीणपंड्या, प्रका. नक्षत्र प्रकाशन पं. रामनारायण नगर, बोकडियावास, साँचौर, जि.-जालोर, राजस्थान पृ. सं. 450, मू. 500/-.

# राष्ट्रीय-शब्दस्य पाणिनीयता निर्बाधा

❑ डॉ. रामशंकरभट्टाचार्यः

**सम्पादकीया टिप्पणी :-**

**''राजश्यालस्तु राष्ट्रियः'' इत्यर्थे संस्कृत-वाङ्मये चिरप्रयुक्तो राष्ट्रियशब्दः पाणिनेः सूत्रेण 'घ' प्रत्यये कृते निष्पद्यते। सूत्रमिदमनुसरन्तो लक्षणैकचक्षुष्का ''नेशनल'' इत्यर्थेऽपि राष्ट्रिय शब्द एव प्रयुज्यतामिति निर्बन्धपराः। अपरे तु ''तत्र भव'' इत्यर्थादितरत्र राष्ट्रे हितः, राष्ट्रस्यायम् इत्याद्यर्थेषु 'वृद्धाच्छ' इत्यनेन कृतेन छप्रत्ययेन राष्ट्रीयशब्दो निष्पाद्यतामित्यभिप्रयन्ति। 'सोऽस्य निवासः' 4/3/87 इत्यर्थेऽपि छ-प्रत्यये कृते राष्ट्रीय इति व्युत्पद्यते। सर्वेषु आप्टेप्रभृतिनिर्मितेषु शब्द-कोषादिषु राष्ट्रीयशब्दो निर्दिष्टोऽपि, प्रयुज्यतेऽपि। अनेन राजश्यालार्थे रूढस्य राष्ट्रियशब्दस्यार्थभ्रान्ति-रपि निवार्येतेति तेषामाशयः। एवं स्थिते किमस्माभिर्निर्णेत-व्यम्? अस्मिन्नेव प्रसङ्गे वाराणसेयानां वैयाकरणानां विद्वद्वररामशङ्कर-भट्टाचार्याणां लेखोऽयममृतलताख्य पत्रिकातः साभारमुद्ध्रियते- प्रधानसम्पादकः।**

राष्ट्रीयशब्दोऽपाणिनीय इति केचिदातिष्ठन्ते। एते खलु राष्ट्रियशब्दस्यैव साधुत्वं संगिरन्ते। अस्मन्मते राष्ट्रिय-राष्ट्रीय-शब्दावुभावपि साधू इति। तदेतदुपपाद्यते राष्ट्रियशब्द एव साधुरिति ये मन्यन्ते ते वदन्ति यतो हि 'राष्ट्रावारपाराद् घखौ' (अष्टा. ४/२/९३) इति पाणिनि-सूत्रेण राष्ट्रशब्दाद् घ-प्रत्यय एव विहितः सर्वासु तद्धितवृत्तिषु (घः=इयः) अतो राष्ट्रियेति शब्द एव साधुः स्यात्। राष्ट्रशब्दात् छप्रत्ययस्य प्रवृत्तिर्नानुशिष्टा भगवता पाणिनिना, अतो राष्ट्रीयेति शब्दस्य सत्ताऽकल्पनीयेति।

मतमिदमेकदेशदर्शनपरमित्यास्माकीनां दृष्टिः। यदि नाम सर्वासु तद्धितवृत्तिषु राष्ट्रशब्दाद् घ-प्रत्यय एव स्यात्, तर्हि शिष्टाभ्युपगतो राष्ट्रिकशब्दः कथं दृष्टिपथमाग-च्छेत्। **मनुस्मृतौ (१०/६१) राष्ट्रिकपदमुपलभ्यते। राष्ट्रिकैः राष्ट्रवासिजनैरिति कुल्लूकभट्टः** +। अत्र राष्ट्र-शब्दाद् यः इकूप्रत्ययो विहितः स तद्धेत एव।

राष्ट्रिकेति अमरे वनौषधिवर्गे। आहात्र स्वामी- 'राष्ट्रमस्ति अस्या राष्ट्रिका' इति (२/४/९४)। अत्र ५/२/११५ सूत्रविहितः ठनूप्रत्यय इति भानुजिदीक्षिते-नोक्तम्।

अत्र केचिद् वदन्ति - 'भवतु नाम केनचिदुपायेन शिष्टप्रयुक्तस्य राष्ट्रिकशब्दस्य सिद्धिः राष्ट्रीयशब्दस्तु न व्याकरणप्रक्रियासिद्धो न वा शिष्टप्रयुक्त इत्यतस्तस्या-साधुता+सिद्धैवेति। उच्यते- **'राष्ट्रावारपाराद् घखौ'** (४/२/९३) इति सूत्रस्य प्रवृत्तिः न खलु कृत्स्ने तद्धितप्रकरणे, प्रत्युत शैषिकप्रकरणपर्यन्ता एवास्य प्रवृत्तिः, अर्थात् ४/३/१३३ पर्यन्ता ये अर्था उक्ताः 'जात-मत-व्याख्यान-संभूत-आगत-अभिजन-भक्ति' इत्यादयः तेष्वर्थेषु राष्ट्रशब्दाद् ४/२/९३ सूत्रविहितः घ-प्रत्यय एव स्यात्। अतएव भक्तिरिति सूत्रस्योदाहरणे (४/३/९५) **तस्येदम्** (४/३/१२०) इति सूत्रस्योदाहरणे च राष्ट्रियपदं प्रयुक्तं काशिकायाम्। यदि बाधकं न स्यात् तर्हि उदाहृतेषु सर्वेषु स्थलेषु घ-प्रत्यय एव स्यादित्यत्र न संशयलेशोऽपि।

परन्तु ४/३/१३४ सूत्रादारभ्य ये विकारादयोऽर्थाः, तेष्वर्थेषु राष्ट्रशब्दात् तत्तत्प्रकरणविहिताः प्रत्यया एव

यथायथं भवेयुः, न तु ४/२/९३ सूत्रविहितो घ-प्रत्ययः, तस्य निवृत्तेः। 'प्राग्दीव्यतोऽण्' इति सूत्रोक्तः अण् प्रत्ययस्तु विकाराद्यर्थेष्वपि भवितुमर्हति यथा- शास्त्रम्, यतो हि 'दीव्यति' सूत्र (४/४/२) पर्यन्तः तस्याधिकार उक्तः सूत्रे एव (४/१/८३)। अथ च ४/३/१३४ सूत्रतो ये विकारादयोऽर्था उपदिष्टाः, तेषु घ-प्रत्ययस्य प्रवृत्तिर्न स्यादिति स्पष्टमाहुर्वृत्तिकृतः- 'तस्य प्रकरणं तस्येति पुनर्वचनं शैषिकनिवृत्त्यर्थम्' इति (४/३/१३३)।

अस्य निषेधस्य प्रयोजनं तु इदमेव यद् विकारावयवादिषु अर्थेषु घादयः प्रत्यया न स्युरिति, अर्थात् **'तस्य विकारः'** (४/३/१३३) इत्यादिप्रकरणे राष्ट्रशब्दात् घ-प्रत्ययो न भवेदिति। एवं सति चतुर्थाध्यायगत-चतुर्थपादे येऽर्थाः सन्ति, तेषु राष्ट्रशब्दाद् घ-प्रत्ययो न स्यात्। यथायथमन्ये प्रत्ययास्तु स्युरेव। पञ्चमाध्यायतः छ-प्रत्ययः (छः = ईयः) तु राष्ट्रशब्दाद् हितार्थे भवितुमर्हत्येव।

यतो हि **तद्धितप्रकरणे घ-प्रत्ययः असार्वत्रिकः, अतो राष्ट्रिकेति शब्दे ठन् प्रत्ययकरणं सम्यगेव।** अतएव सत्यां शास्त्रप्रवृत्तौ राष्ट्रशब्दात् छ-प्रत्ययोऽपि स्यादेव, ततश्च राष्ट्रीयशब्दोऽपि साधुरेव मन्तव्यः। शैषिकाधि-कारबहिर्भूत-प्रकरणे **'तस्मै हितम्'** (५/१/५) इत्यर्थे **यदि छ प्रत्ययः स्यात् तर्हि राष्ट्राय हितम्=राष्ट्रीयम्** इति कथनं साध्वेव स्यात्। अस्मिन् हितार्थे घ-प्रत्ययस्य प्रयोगो न भवितुमर्हति, एतस्मादर्थात् प्रागेव तस्य निवृत्तेः। तथैव **'तदस्य तदस्मिन् स्यादिति'** (५/१/१६) **'तदर्हति'** (५/१/६३) इत्यादिष्वर्थेषु अपि यथायथं कश्चिदपि प्रत्ययः (ठक्-ठन्-अणादीना-मन्यतमः) भवेदेव, न पुनर्घ-प्रत्ययः ४/२/९३ सूत्रविहितः। यथा वैयाकरणानां मते 'पापाय हितम्' इत्यर्थे पापीयम् इति भवति, तथा राष्ट्राय हितं इत्यर्थे राष्ट्रीयमिति साध्वेव स्यात्।

राष्ट्रीयेति पदस्य प्रयोगो राजनीतिग्रन्थेष्वन्वेष्यः। वैदिकग्रन्थेषु चास्य प्रयोगो दृश्यते (मैत्रायणीसंहिता २/१/१२, काठकसंहिता ३७/११) स्कन्दपुराणेऽपि राष्ट्रीयपदमुपलभ्यते (वैष्णवखण्ड, वैशाखमास, ११/४७)। रामतर्कवागीशः मुग्धबोधटीकायां राष्ट्रीय शब्दं प्रायुङ्क्तेति विज्ञेयं (तद्धित, ४३३ सूत्र) अतः राष्ट्रीयशब्दः साधुरेव।

---

**श्रीकृष्ण दाधीच**

**अयि गंगे कलिकलुषविदारिणि, भवभयहारिणि मोक्षप्रदे।**
**विष्णोः चरणनखाग्राज्जन्मिनि शशिधरमौलिनिवाकृते।**
**नृपभागीरथतपवरतोषिणि सगरसुतान्प्रति मुक्तिप्रदे।।**
**प्रत्यक्षे गंगोत्रीधाम्नः शीतलहिमजलरूपकृते।**
**हरिद्वारकृतकलकलनादे लौकिकपितरान् हरिपददे।।**
**तव पुलिने कृतवासान्पौरान्योगिमुनीन्नपि पालिनि हे।**
**तव जलदर्शनस्नानञ्चेद्ये प्रतिदिवस कुर्वन्ति शुभे**
**विमलतरंगिणि पापनिकन्दिनी जनरंजिनि आमोदप्रदे**
**अम्ब त्रिपथगे कांक्षे सन्निधिमभीष्टवरदे कल्पलते।।**
**टीकमविप्रकृता तव यत्स्तुति विमलबुद्धिदे शृणु कृपया।**
**देहि वरं हरिचरणाम्बुजयोः प्रीतिः स्यात्तव हृदि भजताम्।।**

**मुरलीपुरा, जयपुर**

बाबासाहेबआप्टे महोदयानां व्यक्तित्ववर्णने-

# अष्टादशः प्रसङ्गः-प्रेरणादायिनेतृत्वम्

❑ वेणीमाधव गो. धर्माधिकारी

नागपुरतः श्रीधरभास्करवर्णेकरमहोदयाः वर्णयन्ति नागपुरे संघकार्यप्रारम्भानन्तरं बहुकालपर्यन्तं सर्वं कार्यं महाराष्ट्रभाषायामेव प्रचलति स्म। एतदनन्तरं यदा जबलपुरे संघशाखायाः प्रारम्भःसमभवत् ततश्च परावृत्त्य डॉ. हेडगेवारमहोदयाः नागपुरे समायाताः तदा प्रथमवारं नागपुरस्थहाथीखानाशाखायां तेषामुद्बोधनं हिन्दी-भाषायां श्रुतम्। एतदनन्तरं यदा बाबामहोदयैर्मिलनमभूत् हिन्दीप्रशिक्षणार्थिनामिव ते मया सहापि हिन्दीभाषाया-मेव प्रश्नादिकं कुर्वन्त आसन्। तेषां मुखान्नवीनाः नवीनाः हिन्दीशब्दाः श्रोतुं सम्प्राप्ताः। किञ्चित्कालानन्तरं च तेषा-मुद्बोधनादिकमपि हिन्द्यामेव प्रारब्धम्।

बाबामहोदयानां स्वभावे स्वत्वाभिमानमासीत्तेषां स्थायिभावः एतद्विपरीतया कयापि वार्त्तया तेषां चेतसि कोप उद्भवति स्म। वयं जानीमः संघे पूर्वं योगाभ्यासो व्यायामादिकं च सैनिकेष्वांग्लभाषीया देशशब्देष्वेव भवति स्म। निश्चितमेव बाबामहोदयानामेषः प्रयोगोऽमान्यः आसीत्। अस्यां स्थितौ बहवोऽन्येपि स्वयंसेवकाः क्षोभं प्रकटयन्ति स्म। परमरुचित्वेऽपि तेषां मुखात्क्षोभपूर्णाः शब्दाः नैव निस्सृताः। परं निश्चितमेव संघानुशासनं पालयतां तेषां शब्दानां संस्कृतीकरणे बाबामहोदयानां पूर्णः सहयोगः स्यात्। शीघ्रमेव चादेशशब्दानां संस्कृतीकरणमभूत्।

संघकार्ये हानिकारके कस्मिन्नपि कार्ये तेषां मनसि व्याकुलता भवति स्म। एकदा संघकार्यालये (तस्मिन् समये संघकार्यालयः 'नीलसीटीहाईस्कूल' समीपे एकस्मिन् भवने आसीत्) द्वावेतादृशौ प्रचारकौ समागतौ यौ हि कतिपयवर्षपर्यन्तं बङ्गप्रदेशे, तमिलनाडुप्रदेशे च कार्यं कृतवन्तौ। संयोगादहमपि तस्मिन् समये तत्रासम्। बाबामहोदयाः तौ प्राच्छन्-तदा तु तुभ्यं बङ्गभाषा अस्मै च तमिलभाषा विदिता स्यात् ताववदतां नैवेति। बाबा-महोदयास्तयोरुत्तरेणासन्तुष्टाः अवदन् भवादृशा एव जनाः देशे आङ्ग्लभाषायाः मूलं पोषयन्ति। आङ्ग्लभाषां पठित्वा भवन्तौ चिन्तयथ अस्माभिर्भारतस्य सर्वाः भाषाः शिक्षिताः। किं भवतानुभूयते स्वदेशस्य भाषाणामध्ययन-स्यावश्यकतैव नास्ति।

समाजसेवायाः कार्ये स्वक्षेत्रस्य जनजीवनेन समरसतायाः आग्रहः संघेऽस्ति। इदं मन्यते यत् संघकार्यकर्त्रा स्वक्षेत्रस्य सामान्यजनानां भाषायां भोजने वेशभूषायां परम्परासु च सहभागिना भवितव्यम्। एतदुत्तर दायित्त्वं प्रत्ति बाबामहोदयेन तस्मिन् दिने तयोः ध्यानमाकृष्टम्। तेषामेतादृश्याः एव कोपयुक्तायाः व्याकुलतायाः साम्मुख्यं कर्तुं मह्यमप्येकवारं 1940 वर्षे अवसरः प्राप्त आसीत्। बाबामहोदयैरुक्तं मया सम्यक् प्रकारेण संस्कृतभाषणस्याभ्यासः करणीयः। अहम-

वदं-तदा भवद्भिः रघुवंशं, किरातार्जुनीयम्, उत्तररामचरितं ग्रन्थाः अध्येतव्याः। बाबामहोदयाः सहसा अवदन्-दूरे स्थापयन्त्वेतान् पुरातनग्रन्थान्। मया तु भवल्लिखितेनाधुनिकविषयवता ग्रन्थेनैवाध्येतव्यम्। मह्यं तु तद्दिनात दयावदाधुनिकविषये संस्कृतसाहित्यस्य ज्ञानमेव नासीत्। अतो मया शनैरुक्तं यदीदमेव भवता निश्चितं तदा तु भवतां संस्कृताभ्यासो नैव भवितुं शक्नोति। सकोपं तैरुक्तं यदि भवान् मदर्थमावश्यकं संस्कृत-पुस्तकं न लखिष्यति तदा मस्तकस्फोटं करिष्ये। क्षणद्वयस्य गाम्भीर्यानन्तरं तैः शान्तभावेन कथितम्-अस्माकं ग्रीष्मकालीनाः संघशिक्षाप्रशिक्षण-वर्गाः प्रारभ्यमाणाः सन्ति। तदर्थं संस्कृतावतरणानि भवान् लिखित्वा मह्यं प्रददातु अहं तैरेव संस्कृताभ्यासं करिष्ये। अहं 1940-41 वर्षद्वयस्य बौद्धिकेभ्योऽवतरणानि निस्सार्यानूद्य च तेभ्यः प्रदत्तवान्। जानाम्यहं बहुदिनं यावत्तानि तेषां सम्मुखे आसन्।

क्रमशः।

**मा. श्रीवेणीमाधवशर्मा ''धर्माधिकारी''**
**218, धर्माधिकारी भवन, ब्रह्मपुरी, जयपुर**

---

**प्रेरकप्रसङ्गशतकम्**

**एकोनचत्वारिंशत्तमः प्रसङ्गः**

# सिद्धान्तस्य प्रश्नः

❑ **मा. श्रीमती आराधना धर्माधिकारी**

श्रीसुभाषचन्द्रबोसमहोदयैः आइ.सी.एस. परीक्षा-समुत्तीर्णासीत् अधुना ते शीघ्रमेव ब्रिटिशसाम्राज्यस्योच्चाधिकारिणः सम्भविष्यमाणा आसन्। तेषां माता-पितरावतीव प्रसन्नावास्ताम्। यत् तयोर्महती साधना पूर्णा जायमाना आसीत्। परं सुभाषमहोदयाय ब्रिटिश-साम्राज्यस्य सेवाकरणं किञ्चिदपि न रोचते स्म। पितुः सकाशादेकः पारिवारिकः सुहृत् तानवबोधयितुं सम्प्राप्तः। तेन कथितं यदेतादृशी सेवा भाग्येन प्राप्नोति। भूयश्चैतादृशोऽवसरः नैव प्राप्तः। भवद्भिरस्य तिरस्कारो नैव करणीयः। सुभाषबोसमहोदयैरवबोधयन् कथितं-पितृचरणाः विचारयन्ति यद् अस्मभ्यं केवलं दशवर्षेषु गृहप्रशासनं प्राप्स्यति एवं चेयं सेवा ब्रिटिश-राज्यस्य वशंवदता नैव भविष्यति। अहमपीदं जानामि। अहं त्विदमपि जानामि गृहप्रशासने स्थित्वाहं बहूनि जनहितकार्याणि कर्त्तुं शक्ष्यामि। अत एवेयं न समस्या। परं सिद्धान्तस्य प्रश्नो मुख्योऽस्ति। किमस्माभिर्वैदेशिक-सेवां प्रति अद्यतनीयपरिस्थितौ निष्ठावद्भिर्भवितव्यम्। किमस्माभिः कतिपयरजतखण्डार्थं किञ्चिन्मान-सम्मानार्थं च स्वात्मविक्रयः करणीयः। यस्मिन् दिनेऽहमेतस्यै सेवायै ब्रिटिशप्रशासनप्रदत्तेऽनुबन्धपत्रे हस्ताक्षराणि करिष्ये तस्मिन्नेवदिने स्वस्वाधीनतावंचितो भविष्यामि। अन्ततश्च तैरेतस्यै सेवायै पादप्रहारो विहितः।

क्रमशः

**218, धर्माधिकारी भवन, ब्रह्मपुरी, जयपुर**

# भारतीमञ्जुनिकुञ्जम्

## ( पूर्वानुवृत्तम् )

❑ डॉ. रामनारायण झा

### हिन्दीकविसाम्राज्याधिराजः तुलसीदासः

मानसानोकहो दासचिन्तामणिः,
मंजरी चास्य भक्ती रसो राघवः।
आंजनेयस्तुलस्या द्विरेफो रसी,
हा कथम् आहता भारते भारती ।। 246 ।।

नृत्यतीवेह भक्तिस्सदा नर्तकी,
मायिकागुण्ठनं स्फारयन्ती श्रिया।
सा स्वया या मया गीयतां राघवी,
हा कथम् आहता भारते भारती।। 247 ।।

यादृशं भक्तिकाव्यं भुवां मानसं,
संसृतौ नास्ति गद्यं गिरा तादृशम्।
वासिने ब्रह्मरामस्य गेयं मया,
हा कथं भारते भारती आहता।। 248 ।।

वाङ्मयं मन्दिरं मानसं मंजुलं
जानकी-जानि-रामस्य वा प्राकृतम्।
इष्टिका भक्तिलेखा दृढानन्यिका,
हा कथम् भारते भारती आहता।। 249 ।।

मानसानन्दकूपारकेऽस्मिन्समं,
प्लावयन्भारतं भक्तितोयैरमुम्।
कल्पनाकामिनीस्वामिदासः कविः,
हा कथम् आहता भारते भारती।। 250 ।।

प्रस्फुटा भक्तिधारादिमाजस्रिका,
मोदते मज्जयित्वाप्य मुक्तिं मुदा।
यत्र भक्तो यतोऽहैतुकी राघवी,
हा कथम् आहता भारते भारती।। 251 ।।

नन्दकं मानसं यद्विशालं नदं,
फुल्लयन्ती सदा रामनामासवः।
पीयूषस्तद्रसो भक्तिरम्भोजिनी,
हा कथम् आहता भारते भारती।। 252 ।।

मानसं पारिजातः सतां संगतिः,
वृन्तिके द्वे च भक्तिर्भुवो मोचिके।
कोकिलः रामरामेति कूजन् कविः,
हा कथम् आहता भारते भारती।। 253 ।।

कल्पवल्ली वटो मानसं संगति-
रद्भुतश्चास्य मुक्तेर्नु निष्यन्दिनी।
चातको रामभक्तः पिपासुः कविः,
हा कथम् आहता भारते भारती।। 254 ।।

पल्वलं मानसं निर्मलं तज्जलं,
मौक्तिकं यच्चरित्रं मरालः सताम्।
मानसं रामनामामृतं सत्पथी।
हा कथम् आहता भारते भारती।। 255 ।।

व्योम वै मानसं तस्य शब्दात्मकं,
भक्तिरिन्दू रमेन्द्रोऽखिलश्चासुरी।
चन्द्रिकेयं प्रपत्तिर्निशा कौमुदी,
हा कथम् आहता भारते भारती।। 256 ।।

एकलं मानसं भाति रामात्मकं,
भारतं स्थापयेच्छ्रीर्ष्णि यच्छाश्वतम्।
तद्धि गेयं च पेयं न हेयं हृदा,
हा कथम् भारते भारती आहता।। 257 ।।

## देशोन्नतिचिन्तकः दयानन्दः

दैशिकीञ्चोन्नतिं या च ईशं हृदा,
भौतिकीं शाश्वतं मानसीं बौद्धिकीम्।
एषणैषा दयानन्दचित्तेऽनिशम्,
आहता भारते भारती हा कथम्।। 258।।

राष्ट्ररीतिं सुनीतिं विधातुं यमी,
त्यक्तुचेता-कुरीतिं दृढो वेदवित्।
वेदविद्याप्रसारे ददौ जीवनम्,
आहता भारते भारती हा कथम्।। 259।।

मातृसेवां विधातुं स्वया निश्चयी,
वेदभाष्यन्नवीनं सुचक्रे गुरोः।
सङ्गिरा ग्रन्थरत्नद्वयञ्चाज्ञया,
हा कथं भारती भारते आहता।। 260।।

आर्यसंस्थापकोऽसावृषिश्चाद्य सः,
भाष्यभूमिञ्च चक्रे दयानन्दनः।
सत्यमर्थं प्रवक्तुं प्रकाशन्नवं,
भारते भारती आहता हा कथम्।। 261।।

## वेदाध्यात्मिकभाष्यकर्त्ता ऋषिररविन्दः

भौतिकं वेदभाष्यन्निरस्यादिमश् -
चारविन्दोऽचलप्रज्ञकोऽयं श्रुतेः।
गूढ़गूढं रहस्यन्ददौ मे यतिः,
आहता हा कथं भारते भारती।। 262।।

चिन्तयामास सिद्धोऽभवत्तेन सः,
चारविन्दो दृशा दिव्यमर्थं श्रुतेः।
वेदगुप्तार्थबोधं विदित्वा स्वया,
भारती हा कथं भारते आहता।। 263।।

रोचते मे नु ते चाखिलेभ्यस्सखे,
प्रौढिरेषारविन्दस्य प्रज्ञागमे।
सारयेत्सा धियोऽबोधपांशुं दृढ़म्
आहता भारते भारती हा कथम्।। 264।।

**व्याख्याता ( संस्कृतम् )**
**राजकीयकल्याणमहाविद्यालयः, सीकरम्**

# निवेदन

**भारती पत्रिका कार्यालय अपने आदरणीय ग्राहकों तक प्रतिमाह समय पर पत्रिका पहुँचाने की व्यवस्था सुनिश्चित करना चाहता है। इस दृष्टि से सभी ग्राहकों से निवेदन है कि निम्नानुसार अपनी सूचनाएं कार्यालय को पोस्ट कार्ड द्वारा अथवा इसी पत्र को काट कर लिफाफे में कार्यालय के पते पर भेजने का श्रम करें। यदि उक्त प्रकार से सूचना भेजने में कठिनाई हो तो मोबाइल नं.– 09352030291 / 8947055999 पर सूचना लिखवा सकते हैं अथवा SMS भी कर सकते हैं।**

**नाम....................................पुत्र/पुत्री श्री.............................भवन संख्या...........**

**गली/ मोहल्ला/कॉलोनी..................................वाया/पोस्ट ऑफिस..........................**

**तहसील................................जिला........................राज्य..........................**

**देश...................पिन........................................दूरभाष............................**

**मोबाईल नं...........................ईमेल.................................................................**

**निवेदक सुदामा शर्मा , प्रबन्ध सम्पादक**
**भारती संस्कृत मास पत्रिका**
**बी–15, भारती भवन, न्यू कॉलोनी, जयपुर–302001 (राज.) दूरभाष–2379014**
ई–मेल – sanskritbharti09@gmail.com

# यज्ञीयमन्त्रव्याख्या

❑ पं. रामनारायण शास्त्री

**अग्ने त्वं सुजागृहि वयं सुमन्दिषीमहि।**
**रक्षाणो अप्रयुच्छन् प्रबुधे नः पुनस्कृधि।।**
**अग्ने त्वं सुजागृहि वयं सुमन्दिषीमहि।**
**रक्ष नः अप्रयुच्छन् प्रबुधे नः पुनः कृधि।।**

हे जागरणशील अमृतज्योतिरग्निदेव! त्वं सुष्ठुतया सम्यक् प्रकारेण जागरूको भव। वयं कर्मशीला कर्मकराः सामान्यजनाः शयीमहि शोभनतया गाढनिद्रया सुप्याम। अत्र शयनकाले अस्मान् शयमानान् जनान् प्रमादमकुर्वन् अतन्द्रो भूत्वा रक्ष पाहीति भावः। पुनश्च जागरिते अस्मान् कार्यानुष्ठानाय उत्साहितान् कृधि=विधेहि-इति वयं प्रार्थयामः।।

मन्त्रस्यास्य आङ्गिरस ऋषयः, अग्निर्देवता। माध्यन्दिनशतपथब्राह्मणे मन्त्रोऽयं सोमयागनिरूपणे विनियुक्तः। तत्र शयनकाले व्रतपतिमग्निं परिदाय जपति प्रार्थयति वा अग्ने त्वं सुजागृहि वयं सुमन्दिषीमहीत्यग्ने त्वं जागृहि वयं स्वप्स्याम इत्येवैतदाह रक्षाणो अप्रयुच्छन्निति गोपाय नो अप्रमत्त इत्येवैतदाह प्रबुधे नः पुनस्कृधीति यथेतः सुप्त्वा स्वस्ति प्रबुद्धयामहा एवं नः कुर्वित्येवैतदाह। इति ब्राह्मणम्।। "हे अग्ने! त्वं सुष्ठु-2 निद्रारहितो भव। वयं यजमानाः साधु स्वप्स्यामः। किञ्च अप्रमाद्यन् अस्मान् रक्ष तथा अस्मान् पुनः प्रबोधाय कुरु" इति पण्डित ओझा २।।

**अग्निः**- अगि ३ गतौ+नि अङ्गेर्नलोपश्च ४ इत्यौणादिकप्रत्ययः। आमन्त्रितस्य च इत्यनेन आद्युदात्तः। अञ्चु ५ गतिपूजनयोः इत्यस्मादपि अनेनैव प्रत्ययेन अग्नि शब्दः साध्यते। अग्निर्जातवेदा वैश्वानरोऽपि कथ्यते निघण्टौ ६। वैदिके साहित्ये अग्निः ज्योतिः ७ अमृतं ८ अपि निगद्यते। अग्निर्ज्योतिर्ज्योतिरग्निः ९ अग्निर्ज्योतिषा ज्योतिष्मान् १० इति यजुर्वेदः। अग्निर्जागार तमृचः कामयन्ते ११ इति ऋग्वेदः। अग्निर्वैस देवः१२। अग्निः सर्वा देवता:१३। अग्निर्वै सर्वा देवता:१४। अग्निर्देवः। देवत्वेनापि स जागरणशीलः यतोहि देवा न कदापि स्वपन्ति सदैव जाग्रत्येव। न वै देवाः स्वपन्ति १५। जाग्रति देवाः १६।

त्वं = युष्+मदिक् युष्यसिभ्यां मदिक् १७ इति औणादिकप्रत्ययः। युष् इति सौत्रो धातुः। योषति सेवतेऽसौ युष्मद्। सर्वनामवचकः। प्रत्ययस्वरेणायं१८ अन्तोदात्तः। ततः सौपरतः त्वाहो सौ १९ इति त्व आदेशे डे. प्रथमयोरम् २० इति विभक्तेरम् कृते शेषे लोपः २१ इतिलोपे कृते एकादेशे २२ च त्वम् इति। उपसर्गत्वात् सु २३ उदात्तः। जागृहि = जागृ २४ निद्राक्षये इत्यस्मात् लोटि मध्यमपुरूषैक-वचनम्। तिङ्ङतिङः २५ इति सर्वानुदात्तः। संहितायाम्-उदात्तादनुदात्तस्य स्वरितः २६ स्वरिता-त्संहितायामनुदात्तानाम् २७ इति स्वरितप्रचयौ। वयम्= अस्माद् + जस् इत्यत्र यूयवयौ २८ जसि इति अस्मदो वय आदेशः। अन्तोदात्तत्वात् वयं शब्दोऽपिअन्तोदातः। मन्दिषीमहि = मदि धातुरत्र स्वप्नार्थकः। अस्मद् आशिष्युत्तमबहुवचने रूपम्। निघातस्वरः सु उदात्तः। एतावता स्वरितप्रचयौ। रक्ष=रक्ष ३० धातोर्लोटि मध्यमपुरूषैकवचनम्। द्व्यचोऽतस्तिङः ३१ इति संहितायां दीर्घः। धातोः ३२ सूत्रेण अन्तोदात्ते प्राप्ते आद्यन्तवदेकस्मिन ३३ इति परिभाषया रक्ष् आद्युदात्तः अनुदात्तौ सुप्पितौ ३४ इति शप् अनुदात्तः। उदात्तादनुदात्तस्य स्वरितः इतिकृत्वा रक्ष अन्त्यस्वरितः। नः = द्वितीयाचतुर्थीषष्ठीस्थस्य अस्मदो बहुवचनस्य "बहुवचनस्य वस्नसौ ३५" इति नस् आदेशः। स च नित्यानुदात्तः। नश्च धातुस्थोरूषुभ्यः ३६ इति नस्य णत्वम्। नो अप्रयुच्छन्नित्यत्र एङः पदान्तादति ३६ इति पूर्वरूपे प्राप्ते प्रकृत्यान्तः पादम् ३७ इत्यनेन प्रकृतिभावः।

अप्रयुच्छन् = अप्रमाद्यन् युच्छ ३९ प्रमादे इत्यस्मात् शतृप्रत्ययस्य रूपमिदम्। निपातत्वात् ४० नञ् उदात्तः। तत्पुरूषे तुल्यार्थ-तृतीया सप्त. ४१ इत्यनेन पूर्वपद-

प्रकृतिस्वरे अनुदात्तं पदमेकवर्जम् ४२ इति-अनुदात्ते स्वरितात्संहितायाम. इति एकश्रुतिः। प्रबुधे=प्रपूर्वाद् ४३ बुधेः क्विप् गतिकारकोप ४४ पदात्कृत् इति उत्तरपद प्रकृतित्वरत्वेनान्तोदात्तः प्रबुध् शब्दः। ततो विभक्तिरनुदात्ता।

पुनः पुनरित्यव्ययः, नित्यान्यस्वरितः। कृधि=कृञ् ४५ करणे धातोर्लोटि हौ बहुलं छन्दसि ४६ इति शपो लुकि शृसृणुपृकृवृभ्यश्छन्दसि ४७ इति हेर्धित्वे तिङ्ङतिङः ४८ इति निघातस्वरः।। संहितायाञ्च एकश्रुतिः ।।४/१४।।

**।। सन्दर्भाः ।।**


१- मा.श.ब्रा. ३,२,२,२२।।
२- यज्ञसरस्वती अग्निष्टोमाधिकारः पृष्ठ ८२।।
३- धातुपाठभ्वादिगणः ८८।।
४- उणादिसूत्रपाठः ४,५१।।
५- धातुपाठभ्वादिगणः ११५।।
६- निघण्टु ५, १।।
७- अयमग्निर्ज्योतिः। मा.श.ब्रा. ९,४,२,२२।। अग्निर्वै ज्योती रक्षोहा। मा.रा.ब्रा. ७,४,१,३४
८- अग्निरमृतम्। मा.श.ब्रा. १०,२,६,१७।। अमृतो ह्यग्निस्तस्मादाहादब्धायविति। मा.श.ब्रा. १,९,२,२०।।
९- यजुर्वेदः ३, ९।। १० - यजुर्वेदः १३, ४०।।
११- ऋग्वेदः = ५, ४४, १५।।
१२- मा.श.ब्रा. १,७,३,८।।
१३- ऐ.ब्रा. २,३।।तै. ब्रा. १,४,४,१०।।
१४- ऐ.ब्रा. १,१।। मा.श.ब्रा. १,६,२,८।। ता.ब्रा. ९,५,४।।षड्.ब्रा. ४,१।।गो.ब्रा. २,१,१२ व १६।।
१५- मा.श.ब्रा. ३,२,२,२२।।
१६- मा.श.ब्रा. २,१,४,७।।
१७- उणादिसूत्रपाठः १,१३९।।
१८- अष्टाध्यायी सूत्रपाठः ३,१,३।।
१९- अष्टाध्यायी सूत्रपाठः ७,२,९४।।
२०- अष्टाध्यायी सूत्रपाठः ७,१,२८।।
२१- अष्टाध्यायी सूत्रपाठः ७,२,९०।।
२२- अष्टाध्यायी सूत्रपाठः ६,१,१०३।।
२३- फिट्सूत्रपाठः ४,१३।।
२४- धातुपाठ अदादिगणः ६५।।
२५- अष्टाध्यायी सूत्रपाठः ८,१,२८।।
२६- अष्टाध्यायी सूत्रपाठः ८,४,६५।।
२७- अष्टाध्यायी सूत्रपाठः १,२,३९।।
२८- अष्टाध्यायी सूत्रपाठः ७,२,९३।।
२९- धातुपाठभ्वादिगणः १२।।
३०- धातुपाठभ्वारिगणः ४४०।।
३१- अष्टाध्यायी सूत्रपाठः ६,३,१३४।।
३२- अष्टाध्यायी सूत्रपाठः ६,१,१५६।।
३३- अष्टाध्यायी सूत्रपाठः १,१,२०।।
३४- अष्टाध्यायी सूत्रपाठः ३,१,४।।
३५- अष्टाध्यायी सूत्रपाठः ८,१,२१।।
३६- अष्टाध्यायी सूत्रपाठः ८,४,२६।।
३७- अष्टाध्यायी सूत्रपाठः ६,१,१०५।।
३८- अष्टाध्यायी सूत्रपाठः ६,१,१११।।
३९- धातुपाठभ्वादिगणः १२९।।
४०- फिट्सूत्रपाठः ४,१२।।
४१- अष्टाध्यायी सूत्रपाठः ६,२,२।।
४२- अष्टाध्यायी सूत्रपाठः ६,१,१५२।।
४३- धातुपाठभ्वादिगणः ५९७ दिवादिगणः ६१।।
४४- अष्टाध्यायी सूत्रपाठः ६,२,१३८।।
४५- धातुपाठभ्वादिगणः ६,४२ तथा तनादिगणः १०।।
४६- अष्टाध्यायी सूत्रपाठः २,४,७३।।
४७- अष्टाध्यायी सूत्रपाठः ६,४,१०२।।
४८- अष्टाध्यायी सूत्रपाठः ८,१,२८।।
यजुर्वेद ४।१४।।



प्रवक्ता, संस्कृतविभागः राजकीय स्नातकोत्तर महाविद्यालयः, सिरोही, राजस्थानम् ३०७००१

# 'अग्निर्वैश्वकर्मणः स्वर्देवेषु नो दधत्'

❑ श्रीमती सुरचना त्रिवेदी

वेदा ज्ञानविज्ञानस्य चिरन्तना आकरग्रन्था इति आर्याणां चिरन्तनो विश्वासः। कथितं हि महर्षिणा दयानन्देन- 'वेद सब सत्य विद्याओं का पुस्तक है।' धर्मशास्त्रप्रणेतृभिर्मन्वादिभिरपि- 'वेदोऽखिलो धर्ममूलं', 'वेदो धर्ममूलम्' इत्युद्घोषितम्। ऋग्वेद-भाष्यकर्त्रा वेंकटमाधवेन प्रतिपादितं यत्-

**'तिलमात्रे भिद्यमाने पुनश्चाधीयते पदम्।**
**स सूक्ष्मः शक्यते ज्ञातुं नाप्रौरिति निर्णयः।।'**

इमं वैदिकविज्ञानमवेक्ष्य भारतीयानां समादरं वैदेशिका अपि कुर्वन्ति। पुनश्च समस्तानामपि अभिधेयज्ञेयपदार्थानामाकरः ब्रह्माण्डमिदं नानावैचित्र्यं दृश्यादृश्यं चेतनाचेतनात्मकं वस्तुजातं गर्भे दधत् नवनवा-यामानवजिज्ञासायाः केन्द्रबिन्दुः स तिष्ठति। सृष्टेः विकासस्य आदित एव इदानीं पर्यन्तं पृथिव्याः विविधानि रहस्यान्युद्घाटयितुं वेदमन्त्राणां साक्षात्कर्तॄणां ऋषीणां मानसिकी स्थितिः काऽऽसीत् इति वेदाध्ययनेनैव ज्ञायते। वस्तुतः यत् किञ्चिदपि नूतनं दृश्यते लोके तत् सर्वं पूर्वतः विद्यमानस्यैव संस्कृतवाङ्मयस्य परिष्कृतञ्च रूपं भवति। ज्ञान-विज्ञानयोः स्रोतस्त्वेन प्राच्यवाङ्मय-स्य अतिमहत्त्वपूर्णं योगदानमस्ति नाऽत्र कश्चित् सन्देहः यतोहि वेदेषु अग्न्यादिविभिन्नानां तत्त्वानां स्वरूपमौचित्यं च सम्यक्रूपेण प्रतिपादितमस्ति।

जगत्यस्मिन् अग्नेः सर्वव्यापकत्वं सर्वत्रैव प्रत्यक्ष-परोक्षरूपेण दरीदृश्यते। स एव अग्निः अन्तरिक्षमध्ये विद्युत्रूपेण द्युलोके च सूर्यरूपेण विद्यमानोऽस्ति। परमात्मा तपसः अग्निना ब्रह्माण्डं रचितवान्। उक्तं यत्-

**ऋतं च सत्यं चाभीद्धात्तपसोऽध्यजायत।**
**( ऋग्वेद 10/190/1 )**

अग्निरेव सर्वतः उष्णतां प्रकाशं शक्तिं गतिं च उत्पाद्य सर्वहित-साधने संलग्नोऽस्ति। अग्निरेव सूक्ष्मोर्जारूपेण चेतनायां, प्राणेषु, गतिषु च विद्यमानो वर्तते नास्ति अत्र विप्रतिपत्तिः। स एव प्रथमव्यक्तमहाभूतत्वाद् पुरोहित इत्युच्यते -

**अग्निमीले पुरोहितं यज्ञस्य देवमृत्विजम्।**
**होतारं रत्नधातमम्।।( ऋग्वेद 1/1/1 )**

मन्त्रेऽस्मिन् अग्नितत्वस्य देवत्वेन, पुरोहितत्वेन, ऋत्विजत्वेन प्रथमं स्तुतिः कृताऽस्ति। अग्निः न केवलं प्रथमं रूपवद् भूतमस्ति अपितु प्राणदायिनी ऊर्जा-पाकशक्तिः पावकत्वञ्चाग्निना एव लभ्यते।

अग्निःदूतरूपेण सर्वतः ऊर्जायाः प्रसारणं करोति। उक्तं यथा- **अग्निं दूतो पुरोदधे।( यजु. 22/17 )**

तथा च-

**विश्वस्य दूतममृतं - विश्वस्य दूतममृतम्**
**( युज- 15/33 )**

अत्र ऋषिभिः उक्तं यदहं दूतवत् अग्नितत्त्वम् अभिमुखे स्थापयामि। इदं न केवलं मम कृते दौत्यकर्म करोति परं सर्वेषां कृतेऽपि। सम्यग्विचार्यमाणेऽस्मिन् विषये स्पष्टीभवति यद् स्वकीयेन क्रियाशीलत्वेन अग्निः स्वोर्जा नैकान् लक्ष्यान् प्रति प्रेषयति।

**अग्ने यं यज्ञमध्वरं विश्वतः परिभूरसि।**
**सऽइद्देवेषु गच्छति।।( ऋग्वेद 1/1/4 )**

अग्निरेवास्ति सर्वेषां यज्ञानामाश्रयः। वैदिकसाहित्ये यज्ञस्य-यज्ञः वेनः अध्वरः मेधः विदथः नार्यः सवनं होत्रा इष्टिः देवता मखः विष्णुः इन्दुः प्रजापतिः धर्मः इत्येतानि पञ्चदशनामानि उल्लिखितानि। (निघण्टु, अध्याय 3 खण्ड-17)

सामवेदस्य आरम्भ एव यज्ञविषयकं वर्णनं प्राप्यते-

**त्वमग्ने यज्ञानां होता विश्वेषां हितः। देवेभिर्मानुषे जने।।( सामवेद-मन्त्र सं.-2 )**

महर्षिदयानन्देन यजुर्भाष्ये यज्ञ विषये लिखितं-

''**धात्वर्थाद्यज्ञार्थस्त्रिधा भवति। विद्याज्ञान-धर्मानुष्ठानवृद्धानां देवानां विदुषामैहिकपारमार्थिकसुखसम्पादनाय सत्करणं, सम्यक्पदार्थ-गुणसम्मेलनविरोधज्ञानसंगत्या शिल्पविद्याप्रत्यक्षीकरणं, नित्यं विद्वत्समागमानुष्ठानं, शुभविद्यासुख-धर्मादिगुणानां नित्यं दानकरणमिति।'' ( यजुर्वेद-भाष्यं-महर्षिदयानन्देन प्रणीतम् 1/2 )**

दयानन्देन प्रतिपादितेनानेन स्वरूपेण प्रतिभाति यद् मानवस्य सम्पूर्णं जीवनं हि यज्ञमयम्। समस्तेऽस्मिन् ब्रह्माण्डे परमाणोरारभ्य महत्परिमाणपर्यन्तं यज्ञक्रिया प्रचलति। स्वस्योपकेन्द्रेषु अन्तर्भूतेषु अवयवेषु एकमेव तत्त्वं यज्ञात् प्रादुर्भवति। यज्ञतपसोद्भूताभ्याम् ऋतसत्याभ्यां सृष्टेः द्विविधं शक्तिमयं रूपं प्रकटीभवति। ऋतं गतिशीलं सत्यं च केन्द्रभूतं गतिं कुर्वन्नपि स्थिरवत् प्रतीयते। वैज्ञानिकभाषायाम् ऋत- ELECTRON इति, सत्यं च-PROTON इति नाम्ना उच्यते।

ऋत तत्त्वं सत्याश्रयत्वेनैव स्वस्य रूपं द्योतयति रूप-वैभिन्न्यं च प्रदर्शयति तथा '**रूपं रूपं प्रतिरूपो बभूव**' इति स्थितिमुत्पादयति। चिन्तनीयमिदं यत् नैकेषु भौतिकतत्त्वेषु न्यूनाधिकत्वेन आदानविसर्गात्मकक्रियया यज्ञक्रिया सम्पद्यते। तेषु दानाऽदानक्रियापूर्वकं संगति-करणेन, पदार्थयोः पारस्परिकेण आकर्षण-विकर्षणेन ऊर्जायाः उत्पत्तिः भवति। अत एव सृष्ट्यामस्याम् ऊर्जोत्पादनं संभरणं च यज्ञेनैव भवितुं शक्यते। पदार्थानां संयोगवियोगात्मककार्याभावे अस्माकं कामनानुकूलं नैव प्राप्तुं शक्यते। इयमेव संगतिकरणक्रिया अग्निं बिना नैव संभवति। अतः अस्माकमपि यज्ञः अग्नेः तापं विना नैव पूर्णतां गच्छति। अस्य अग्नेः स्थापनकार्यं भुवाश्रितं भवेत् अन्तरिक्षाश्रितं वा-अस्माभिरेव करणीयम्। सोऽग्निः भौतिकः भवेद् वा अन्यविधः तैजसद्रवद्रव्याणां धूमजन्यविद्युत् वा अस्माभिः यस्य कस्यापि आश्रयः करणीयः। तत्त्वानां गुणान् ज्ञात्वा अग्निसाहचर्येण तेषां मिश्रणं निर्माय स्वस्योपयोगार्थं सृष्टिप्रक्रियायाः आनुकूल्यकारणात्वाद् वेदेषु तेषां यज्ञरूपमङ्गीकृतं वर्तते।

एतस्यां स्थितौ सृष्टेः तत्त्वानां गुणधर्मान् विज्ञाय स्वकामनापूर्तये यः प्रयत्नः भविष्यति तस्मिन् संयोग-वियोगरूपकार्यं अग्नेरभावे नैव संभवति। अयम् अग्निः अस्मिन् ब्रह्माण्डे प्रथमतत्त्वमस्ति यः ऊर्जायै पदार्थान् एकस्मात् स्थानात् अपरं स्थानं नयति। पदार्थानां नयनानयनत्वेन तस्य होतृरूपं कल्पितम्। हव्यपदार्थानां दातृगृहीतृत्वात् अग्निरेव उभयोः गत्योः कर्त्ताऽस्ति। उक्तं यद्-

**अयमिह प्रथमो धायि धातृभिर्होता यजिष्ठो अध्वरेष्वीड्यः।**
**यमप्नवानो भृगवो विरुरुचुर्वनेषु चित्रं विभ्वं विशे-विशे।।**

**( यजु. 3/15 )**

अनेन प्रकारेण अग्निः होतृकर्मणि सर्वप्रथमः। अन्येषां पदार्थानामपेक्षया अयमग्निः संगतिकरणे प्रमुखः हेतुः कथ्यतेऽथवा जविष्ठः कथितः। वेदेषु यज्ञपदस्यापेक्षया 'अध्वर' पदस्य प्रयोगः प्रचुरमात्रायामुपलभ्यते। यदा अग्निक्रिया अध्वररूपेण सर्वाणि ब्रह्माण्डीयतत्त्वानि परिवेष्टयति तदा याज्ञिकदीप्तीनां-रश्मीनां च सम्प्रेषणं सर्वत्रैव ऊर्जारूपेण भवति। यज्ञोर्जोपयोगेन न केवलं स्थूलपरिवर्तनमपितु विश्वस्य मानसिकं-बौद्धिकमपि परिवर्तनं संभाव्यते। अस्मिन् विषयेऽपि वेदेषु उक्तं-

**यद्देवानां मित्रमहः पुरोहितोऽन्तरो यासि दूत्यम्।**
**सिन्धोरिव प्रस्वनितासऽ ऊर्मयोऽग्नेर्भ्राजन्तेऽअर्चयः।।**

**( ऋग्वेद 1/44/12 )**

अत्र 'सिन्धोरिव' शब्देन अग्नेः विविधगुणकर्मणां प्रकाशनं कृतम्। अग्निना दीप्तिः-दीप्त्या प्रकाशः-प्रकाशेन शक्तिः गतिश्च-तदनन्तरं ध्वनितरङ्गाणां निर्माणं, प्रकाशनं, सञ्चालनं च भवति। गभीरतया चिन्तनेन ज्ञायते यद् एतेषां कार्याणां मूले अग्निरेव तिष्ठति।

अन्यत्रापि उक्तं-

**जुष्टो हि दूतोऽसि हव्यवाहनोऽग्ने रयीरध्वराणाम्।**

**सजूरश्विभ्यामुषसा सुवीर्यमस्मै धेहि श्रवो बृहत्।।**

**( ऋग्वेद 1/44/2 )**

मन्त्रेऽस्मिन् अग्नितत्त्वस्य ऋण-धनात्मकं विद्युदग्निरूपं वार्णितम्। वेदमन्त्रैः ज्ञायते यद् अग्निरेव अन्तरिक्षे विद्युदग्निरूपेण स्थितः। सृष्ट्यामुत्तरोत्तरं कार्यभूताः पदार्थाः परस्पराधारभूताः भवन्ति अत एव चरन्ति विद्युतो दिवि (ऋग्वेद 9/4/3) इति वेदवाक्यं द्युलोकेऽन्तरिक्षे च विद्युद्धारायाः (अग्न्योर्जायाः) सञ्चालनं प्रकटयति। विद्युदग्नेः पवमान गुणत्वादेव वाक् सन्देशः यत्र कुत्रापि प्रेषयितुं शक्यते।

उक्तं यथा-

**अश्विना पुरुदंससा नरा शवीरया धिया**

**धिष्णया वनतं गिरः। ( ऋग्वेद 1/3/2 )**

ध्वनिरूपस्य हव्यस्य स्वीकरणेन होतृरूपेण ध्वनेः प्रसारणम् अग्न्योर्जया एव सम्पादितं भवति।

अन्येषु स्थलेषु अपि शब्दग्रहणे अग्न्योर्जायाः महत्त्वं प्रतिपादितम्-

- **अग्निर्गन्धर्वः**। (यजु. 18/38) अत्र गन्धर्व शब्दस्य अर्थः अस्ति यो गां वाचं धारयतीति गन्धर्वः।

- **अग्निर्जुषतु नो गिरः।** (ऋग्वेद 5/13/3)

- **श्रुत्कर्णं स प्रथस्तमं त्वा गिरा दैव्यं मानुषा युगा।** (यजु. 12/111)

एतेषु मन्त्रेषु स्पष्टीकृतम् यद् वाक्शक्तिमूले अग्निरेवास्ति।

वेदेषु पारमार्थिक दृष्ट्या अग्निशब्दस्य परमात्मैव प्रधानोऽर्थः अग्निः कथं परमात्मार्थे संगच्छते इति प्रमाण-पुरस्सरं रामनाथमहोदयैः स्वकीये सामवेदभाष्ये प्रतिपादितम्- ''**अग्निशब्दवाच्यः परमात्मा हि सर्वेषामुपासकानामग्रणीः अग्रनायकः मार्गप्रदर्शक इति यावत्। स सर्वेषु यज्ञेषु अग्निहोत्राश्वमेधान्तरेषु, अध्ययनाध्यापनादिषु, वापीकूपतडागोद्यान चिकित्सालयादिनिर्माणरूपेषु इतरेषु च परोपकार-यज्ञेषु प्रणीयते, आदर्शरूयेण सम्मुखं स्थाप्यते।**''

अर्थादग्निहोत्रेण सदैव दयादानपरोपकारकर्त्तव्य-पालनपठनपाठनादीनि इतराणि यान्यपि श्रेष्ठकर्माणि जगति जनेन सम्पादनीयानि विद्यन्ते तानि सर्वाणि अग्निप्रधानयज्ञपदवाच्यानि।

अग्न्योर्जायाः उपयोगार्थम् अस्य स्थापना एकस्मिन् यान्त्रिककेन्द्रमध्ये करणीया। तस्य परिधिं विनिश्चित्य यथेच्छस्थाने प्रयोगाय साधननिर्माणानन्तरं तदनुकूलो मार्गः स्वीकर्त्तव्यः, यथोक्तम् अस्मिन् मन्त्रे-

**यं परिधिं पर्यधत्था अग्ने देव पणिभिर्गुह्यमानः तन्त एतमनुजोषं भराम्येष नेत्त्वदपचेतयाता अग्नेः प्रियं पाथोऽपीतम्।।( यजुर्वेद 2/17 )**

अग्निरेवास्ति विश्वस्य प्रथमं प्रत्यक्षीभूतं तत्त्वम्। अस्य सर्वव्यापकत्वेन अयं महाभूतानामायतनम् इति वक्तुं शक्यते। स अग्निः मेध्यः यजनयोग्यः सङ्गतिकारकः पवित्रः स्वीकरणीयः सेचनसामर्थ्ययुक्तश्चास्ति।

स्वस्य हव्यवाहनत्वेन - '**वह्निरसि हव्यवाहनः** (यजुर्वेद 5/31)'

शब्दरूप**स्य** प्रकाशकत्वेन- '**ऋतावानं महिषं विश्वदर्शतमग्निं सुम्नाय दधिरे पुरो जनाः**' (यजुर्वेद 12/111)

**अमृतत्वेन-अग्निरमृतोऽभवद्वयोभिः।** (यजुर्वेद 12/25)

अग्निः स्वस्य शक्तिस्वरूपम् ऊर्जारूपेण सर्वत्र प्रसारयति। अग्निः अस्माकं कृते पूज्यः, सः अग्निः अस्माकं सर्वाणि कार्याणि सिद्धीकरोति-

**यत्र धारा अनपेता मधोर्घृतस्य च याः।**

**तदग्निर्वैश्वकर्मणः स्वर्देवेषु नो दधत्।।**

**(यजुर्वेद 18/65)**

साम्प्रतं ममानवतायाः संरक्षणार्थं प्रेमानुशासनस्य स्थापनार्थं शान्त्यास्तिकताभ्युदयार्थं यज्ञेनोद्भूताऽग्न्यो-र्जायाः प्रयोगः सर्वैः करणीयः।

**प्रवक्ता-संस्कृत विभागः**

**भगवानदीन आर्यकन्या महाविद्यालयः,**

**लखीमपुरं, खीरी, म.प्र.**

नारी-स्तम्भः

# उत्थानवानेव सदा जयी स्यात्

❑ डॉ. राजेश्वरी भट्टः



महद् गौरवस्य विषयोऽयं वर्तते यत् 2015 तमे वर्षे 'संघ लोकसेवाआ योग' द्वारा आयोजितायां राष्ट्रे सर्वाधिकप्रतिष्ठितायां लोकसेवा (सिविलसर्विस) परीक्षायां प्रकृष्टप्रज्ञापरा 22 वर्षीया सुश्री 'टीना डाबी' सर्वोच्चं स्थानमधिगम्य राष्ट्रे बहुश्रुता जाता। 'टीना डाबी' बाल्यादेव कुशाग्रबुद्धि- सम्पन्नाऽस्ति। विद्यालये पठन्ती टीना सर्वदा सर्वासु कक्षासु प्रथमस्थानमधिगम्य विद्यालयस्य परिवारस्य च गौरवमवर्द्धयत। ततः 'केन्द्रियमाध्यमिक बोर्ड' द्वारा आयोजितायां द्वादशकक्षापरीक्षायांपरिणामे वरीयतासूच्यां प्रथमस्थानं लब्ध्वा विद्यालयेऽ-भिनन्दनीया जाता। ततः प्रभृति 'चरन् वै मधु बिन्दति' इति वैदिकमन्त्रेणाभिप्रेरिता टीना भारतीयप्रशासनिक सेवायां (IAS) साफल्य-मधिगन्तुं दृढ़संकल्पवती जाता। सम्प्रति दिल्लीनगरे 'लेडी श्रीराम- महाविद्यालये' अध्ययनेन सह भारतीयप्रशासनिक- सेवापरीक्षायाः कृते विशिष्टमध्ययनं टीनाया दैनन्दिनी अभवत्। स्नातकपरीक्षां प्रथमश्रेण्यामुत्तीर्य टीना लेडी श्रीराममहाविद्यालये प्रशंसनीयाऽनन्या च जाता। इदानीम् एकाग्रमनसा प्रतियोगिपरीक्षायाः कृते संलग्नाऽभवत्। दूरदर्शनमाध्यमेन समाचारपत्रैश्च ज्ञायते यत् आत्मनो लक्ष्यस्य सिद्ध्यै नित्यम् अष्टहोरात्मकमध्ययनं टीनाया दिनचर्या जाता अध्ययनक्रमे यदा टीना श्रान्तामात्मानमन्वभवत् तदा दूरदर्शनकार्यक्रमाणां दर्शनेन, संगीतश्रवणेन च मनोरञ्जनमकरोत्। टीनाया मते अस्याः सफलतायाः मूले पित्रोर्महती भूमिका वर्तते। टीनायाः पिता 'जसवन्त डाबी' मूलतः जयपुरनिवासी वर्तते कार्यवशात् कश्चित्कालः तेन भोपालनगरे यापितः इदानीं स दिल्लीनगरे 'टेलीकोम' कार्यस्थले कार्यरतोऽस्ति। कार्यस्थलेऽतिव्यस्तोऽपि पिता अवकाशसमयं पुत्र्याः सह संविभजति विनोदयति च। का कथा टीनाया जनन्या हिमान्याः या पुत्र्याः संकल्पं साधयितुं मनोवाक्कायकर्मभिः समर्पिता-ऽदृश्यत। अध्ययने संलग्नायाः पुत्र्याः क्रमे गृहे काऽपि बाधा न भवेद् एतत्कृते टीनाया जननी 'हिमानी' सेवामुक्तेः द्विवर्षपूर्वमेव अवकाशं गृहीतवती। प्रकृष्टप्रतिभया दृढप्रयत्नेन, सत्संकल्पेन च 'टीना डाबी' दुष्करायां भारतीयप्रशासनिकसेवा-(IAS) परीक्षायां प्रथमप्रयासेनैव सर्वोच्चं स्थानमधिगम्य राष्ट्रे ललाटिका जाता। सम्प्रति 'टीना डाबी' स्वकर्मभूमिरूपेण हरियाणाक्षेत्र- मवृणोत्। टीनाया मते हरियाणाक्षेत्रे नारीणां स्थितिः सुदृढा नास्ति। तत्र नारी अनेकाभिः कुरीतिभिः रूढ़िभिश्च ग्रस्ता त्रस्ता अस्तव्यस्ता च दृश्यते। नारीशिक्षा-सूचकाङ्कोऽपि अस्मिन् क्षेत्रे सन्तोषप्रदो नास्ति। एवमेव

**लिङ्गानुपात-दृष्ट्याऽपि हरियाणा क्षेत्रे वैषम्यं वर्तते। अतः हरियाणाक्षेत्रे कार्यं कृत्वा 'टीना डाबी' कृतार्था भविष्यति। टीनाया गरिममयेन व्यक्तित्वेन कर्त्तृत्वेन च ज्ञायते यत् सत्संकल्पेन दृढ़श्रमेण च नास्ति किञ्चन दुष्करम्।**

## हिन्दी अनुवाद

अत्यन्त गौरव का विषय है कि सन् 2015 ई. में 'संघ लोक सेवा आयोग द्वारा' आयोजित राष्ट्र में सर्वाधिक प्रतिष्ठित सेवा परीक्षा में प्रकृष्ट प्रतिभाशालिनी 22 वर्षीया सुश्री 'टीनाडाबी' सर्वोच्च स्थान प्राप्त कर राष्ट्र में सम्मान्या एवं बहुश्रुता हो गई। 'टीनाडाबी' बाल्यावस्था से ही कुशाग्र बुद्धि सम्पत्ता रही। विद्यालय में अध्ययन के समय टीना ने सदैव सभी कक्षाओं में प्रथम स्थान प्राप्त किया है तथा विद्यालय एवं परिवार का गौरव बढ़ाया है। इसके पश्चात् बारहवीं (12) कक्षा में केन्द्रिय माध्यमिक बोर्ड द्वारा आयोजित परीक्षा परिणाम में वरीयता सूची में प्रथम स्थान प्राप्त कर विद्यालय में 'टीना' सम्मानित हुई है। 'केन्द्रिय माध्यमिक शिक्षा बोर्ड' द्वारा आयोजित परीक्षा में सफलता के बाद 'श्रम से ही अमृत की प्राप्ति होती है।' इस वैदिक मन्त्र से प्रेरणा प्राप्त कर टीना ने भारतीय प्रशासनिक सेवा में सफलता प्राप्त करने का दृढ़ संकल्प किया। दिल्ली नगर में 'लेडी श्रीराम महाविद्यालय' में स्नातक परीक्षा के लिए अध्ययन के साथ-साथ 'भारतीय प्रशासनिक सेवा' के लिए विशिष्ट परीक्षा में प्रथम स्थान प्राप्त कर टीना अपने महाविद्यालय में प्रशंसनीया एवं अनन्या के रूप में अभिनन्दित हुई। टीना शीघ्र एकाग्र मन से प्रतियोगी परीक्षा की तैयारी में संलग्न हो गई। दूरदर्शन एवं समाचार पत्रों से ज्ञात होता है कि अपने संकल्प की सिद्धि के लिए टीना प्रतिदिन आठ घंटे अध्ययन करती थी। अध्ययन के क्रम से जब कभी 'टीना' अपने को थका हुआ अनुभव करती थी तो कभी दूरदर्शन के कार्यक्रम के द्वारा कभी संगीत सुनकर अपना मनोरञ्जन करती थी। 'टीनाडाबी' के अनुसार उसके जीवनोन्नयन में माता-पिता की महती भूमिका है। टीना के पिता 'जसवन्त डाबी' मूलतः जयपुर निवासी हैं। कार्य के सिलसिले में कुछ समय वे भोपाल में रहे, अब दिल्ली में टेलीकॉम कार्यालय में कार्यरत हैं। अपने कार्यस्थल पर अत्यन्त व्यस्त रहने पर भी पिता अपना अवकाश का समय पुत्री के साथ विनोद में व्यतीत करते हैं। 'टीनाडाबी' की माता के त्याग का तो कहना ही क्या? जो पुत्री के संकल्प की सिद्धि के लिए तन मन वचन कर्म से समर्पित है। अध्ययन के क्रम में संलग्न पुत्री को घर में किसी प्रकार का व्यवधान न हो इसीलिए 'टीना' की माता हिमानी ने सेवा मुक्ति से दो वर्ष पूर्व ही अवकाश ग्रहण कर लिया। प्रकृष्ट प्रतिभा, दृढ़ प्रयत्न एवं सत्संकल्प से टीना डाबी ने, दुष्कर भारतीय प्रशासनिक सेवा (IAS) परीक्षा में प्रथम प्रयास में ही सर्वोच्च स्थान प्राप्त कर राष्ट्र में विशिष्ट स्थान एवं सम्मान प्राप्त किया। टीना डाबी ने हरियाणा क्षेत्र को अपनी कर्मभूमि के रूप में चुना है। 'टीना' के मत में हरियाणा क्षेत्र में नारियों की स्थिति सुदृढ़ नहीं है। इस क्षेत्र की नारी अनेक रूढ़ियों एवं कुरीतियों से ग्रस्त, त्रस्त एवं अस्त-व्यस्त प्रतीत होती हैं। नारी शिक्षा की दृष्टि से भी यहाँ स्थिति सन्तोषप्रद नहीं है। इसी प्रकार लिङ्गानुपात की दृष्टि से भी हरियाणा प्रदेश में विषमता दिखाई देती है। अतः हरियाणा क्षेत्र में कार्य कर टीना अपने को कृतार्था अनुभव करेगी। टीना के व्यक्तित्व एवं कर्तृत्व से ज्ञात होता है कि सत्संकल्प एवं दृढ़ परिश्रम द्वारा कुछ भी दुष्कर नहीं है।

आयुर्वेद-स्तम्भः

# तं योगमृषयो विदुः

❑ प्रो. बनवारीलालगौडः
पूर्व-कुलपतिः

**जूनमासस्यैकविंशतितमे दिनाङ्के विश्वयोग-दिवसो वर्तते। दिवसेऽस्मिन् विश्वस्य बहुषु देशेषु सार्वजनिकरूपेणोत्सवपूर्वकं जनाः योगस्य प्रदर्शनं करिष्यन्ति। देशेष्वेतेषु सर्वेष्वेव भारतदेशः योग-कर्तृत्वेन प्रमुखोऽस्ति। विश्वयोगदिवसस्य निश्चितस्य दिनाङ्कस्योद्घोषणा तु गतवर्ष एव सञ्जाता। अतः पूर्वं योगस्य स्थितिः नैवासीदिति तु न। यतो हि भारतदेश एव योगस्य जनको वर्तते। वैदिककालत एव योगस्य प्रचलनं भिन्न-भिन्नस्वरूपेऽस्ति। अस्य व्यवस्थितः प्रसारस्तु पातञ्जलयोगसूत्रस्य रचनाऽनन्तरमेव जातः।**

जून मास के 21वें दिनाङ्क को विश्व योग दिवस है। इस दिन विश्व के अनेक देशों में सार्वजनिक रूप से उत्सवपूर्वक लोग योग का प्रदर्शन करेंगे। इन सभी देशों में योगकर्ता के रूप में भारतदेश प्रमुख है। विश्वयोग दिवस के निश्चित दिनाङ्क की उद्घोषणा तो गतवर्ष ही हुई है, इससे पहले योग की स्थिति नहीं थी ऐसा तो नहीं था। क्योंकि भारत देश ही योग का जनक है। वैदिककाल से ही योग का प्रचलन भिन्न-भिन्न स्वरूप में रहा है। इसका व्यवस्थित प्रसार तो पातञ्जल योगसूत्र की रचना के बाद ही हुआ है।

**पतञ्जलिमहर्षेः कार्यकालस्तु केवलमीशातः शतद्वयवर्षपूर्वमेवासीत्। श्रीमद्भगवद्गीतायाः प्रचलनं त्वतः पूर्वमेवासीत्। गीतायां योगस्य विस्तृतं व्यवस्थितञ्च वर्णनं विद्यते। उपदेशात्मके हि तस्मिन् महाग्रन्थे ज्ञानयोगस्य कर्मयोगस्य भक्तियोगस्य च विस्तृतं वर्णनं सुव्यवस्थितमस्ति, किन्तु केवलस्य चित्तवृत्तिनिरोधात्मकस्य योगस्य व्यवस्थितं सूत्रात्मकं वर्णनं पातञ्जलयोगसूत्रे वर्तते। यैरुपायैश्चित्तस्य वृत्तीनां निरोधो भूत्वा नियन्त्रण-पूर्वकमेकाग्रचित्तता भवति तामेव 'योगः' इति कथयन्ति तज्ज्ञाः। अस्य योगस्य पूर्णरूपेण प्रयोगो मोक्ष-प्राप्त्यर्थमेव क्रियते योगिभिः, पुनरपि पूर्णत आत्यन्तिकरूपेण दुःखापहारको ह्येष योगः, प्राथमिकरूपेण सर्वरोगापहारको विद्यते।**

पतञ्जलि महर्षि का कार्यकाल तो ईशा से केवल दो सौ वर्ष पूर्व ही था। श्रीमद्भगवद् गीता का प्रचलन तो इस से भी पहले से था। गीता में योग का विस्तृत और व्यवस्थित वर्णन है। उपदेश स्वरूपक उस महान् ग्रन्थ में ज्ञानयोग, कर्मयोग और भक्तियोग का विस्तृत वर्णन सुव्यवस्थित रूप से है। किन्तु केवल चित्तवृत्ति-निरोधात्मक योग का व्यवस्थित सूत्रात्मक वर्णन पातञ्जल योगसूत्र में है। जिन उपायों के द्वारा चित्त की वृत्तियों का निरोध हो कर नियन्त्रणपूर्वक एकाग्रचित्तता होती है उसको ही उस विषय के जानने वाले विद्वान् 'योग' कहते हैं। इस योग का पूर्ण रूप से प्रयोग योगियों के द्वारा मोक्षप्राप्ति के लिए ही किया जाता है, फिर भी पूर्ण रूप से आत्यन्तिक रूप से (अन्तिम रूप से) दुःख को दूर करने वाला यह योग प्राथमिक रूप से सभी रोगों को दूर करने वाला है।

**अग्निवेशतन्त्रस्यायुर्वेदीयस्य ग्रन्थस्य महर्षिणा चरकेण यः प्रतिसंस्कारः कृतः तेन हि तत्तन्त्रं 'चरकसंहिता' इति नाम्ना विख्यातम्, अधुनापि चोपलभ्यत एतत्तन्त्रम्। महर्षेश्चरकस्य कालोऽपि स एवास्ति यो हि महर्षेः पतञ्जलेः वर्तते। केषाञ्चिद् विदुषान्त्वेतन्मतं विद्यते यदेतौ द्वौ पृथक् पृथङ्नैवास्तामपित्वेक एव विद्वान् रचनात्रयस्य (द्वयोः ग्रन्थयोरेकस्य च महाभाष्यस्य) रचयिता आसीत्। महर्षिणानेन चरकेण चरकसंहितायाः शारीरस्थाने दर्शनात्मकमध्यात्मपरकं विवरणं विन्यस्तं तत्रापि च शारीरस्थानस्य प्रथमेऽध्याये विशेषेण योगस्य विवेचनं सूत्ररूपे कृतमस्ति। यतोहि योगो दुःखहा भवति, मनसश्च नियन्त्रको वर्तत्तेऽत एव प्राथमिकरूपेण शरीरजानां मानसिकानाञ्च रोगाणामपि निवारणे स्वतन्त्ररूपेण सहायकत्वेन च समर्थो भवति।**

आयुर्वेदीय ग्रन्थ अग्निवेशतन्त्र का महर्षि चरक के द्वारा जो प्रतिसंस्कार किया गया है, उससे ही वह तन्त्र 'चरकसंहिता' इस नाम से विख्यात हुआ है। यह तन्त्र वर्तमानकाल में भी उपलब्ध है। महर्षि चरक का काल भी वही है जो कि महर्षि पतञ्जलि का है। कुछ विद्वानों का तो यह मत है कि ये दोनों दो पृथक्-पृथक् विद्वान् नहीं थे अपितु एक ही विद्वान् तीन रचनाओं (दो ग्रन्थ और एक महाभाष्य का) का रचयिता था। इस महर्षि चरक के द्वारा चरकसंहिता के शारीर स्थान में दर्शनात्मक अध्यात्मपरक विवरण को विशेषरूप से रखा है, उसमें भी शारीरस्थान के प्रथम अध्याय में विशेषरूप से योग का विवेचन सूत्ररूप में किया है। क्योंकि योग दुःखापकारक होता है और मन का भी नियन्त्रक होता है इसलिए प्राथमिक रूप से शरीर में उत्पन्न होने वाले और मानसिक रोगों के भी निवारण में स्वतन्त्र रूप से और सहायक रूप से समर्थ होता है।

**यद्यपि योगस्य क्षेत्रमतिविस्तृतं वर्तते प्रयोजन-मपि च पारमार्थिकरूपेण मोक्षस्य प्राप्तिरेवास्ति यत्र हि जन्ममृत्योर्बन्धनात् जीवात्मनः पूर्णतः विनिर्मुक्तिर्जायते। तथापि रोगविनिर्मुक्त्यर्थमप्यस्य प्रयोगः समीचीनः। योगस्योपयोग एतत्पूर्त्यर्थं निम्नप्रकारेण भवति, यथा हि-**

**1. मनोविकासार्थम्**

**2. स्वास्थ्यसंरक्षणार्थम्**

**3. रोगनिवारणार्थम्**

**सामान्यतया मानसिकरोगाः प्रमुखरूपेण रजस्तमसोः विकृत्या भवन्ति शारीरिकाश्च रोगाः वातपित्तकफैः शारीरदोषैर्भवन्ति। एतेषु सर्वेष्वेव मनसः सहयोगस्तु भवत्येव अतः शरीरजानां रोगाणां निवारणे मानसिकरोगाणाञ्च निवारणे सत्वावजय-स्त्वावश्यक एव, एष तु योगमाध्यमेनैव भवति।**

यद्यपि योग का क्षेत्र अत्यन्त विस्तृत है और प्रयोजन भी पारमार्थिक रूप से (अन्तिम रूप से) मोक्ष की प्राप्ति ही है जिसमें कि जीवात्मा की जन्म और मृत्यु के बन्धन से पूर्णतः विनिर्मुक्ति होती है। फिर भी रोग-विनिर्मुक्ति के लिए इसका प्रयोग उपयुक्त है। इसकी पूर्ति के लिए योग का उपयोग निम्न प्रकार से होता है। जैसे -

1. मन के विकास के लिए

2. स्वास्थ्य संरक्षण के लिए

3. रोगनिवारण के लिए

सामान्यतया मानसिक रोग प्रमुख रूप से रजस् एवं तमस् की विकृति से होते हैं और शारीरिक रोग वात-पित्त-कफ (इन तीनों) से होते हैं। इन सब में ही मन का सहयोग तो होता ही है अतः शारीरिक रोगों के निवारण में और मानसिक रोगों के निवारण में सत्त्वावजय (मन को जीतना) तो आवश्यक ही है, यह तो योग के माध्यम से ही होता है।

**1. मनोविकासार्थम्- योगस्याष्टाङ्गत्वं निर्दिष्टं, केवलमासनानामभ्यासकरणेन केवलेन च प्राणायामेन न चित्तवृत्तिनिरोधो भवत्यपित्वष्टाङ्गयोगस्य प्रयोगेणैवैतत्पूर्णरूपेण सम्भवम्। पुनरपि यम-नियम-आसन-प्राणायामात्मकानां चतुर्णां प्रयोगेण मनसो विकासस्तु भवत्येव। एतैस्तु सत्त्वावजयस्याहितेभ्यो-ऽर्थेभ्यो मनोनिग्रहात्मकस्य प्रयासः सफली भवति। इत्थं करणेन रोगाः न भवन्ति।**

**2. स्वास्थ्यसंरक्षणार्थम्- आयुर्वेदे धातुसाम्यस्याधिकं महत्त्वं वर्तते। धातुसाम्यस्त्वाहारविहाराणां पथ्यात्मकेन प्रयोगेणैव भवति, एषः प्रयोगः इन्द्रियेणेन्द्रियार्थेन समनस्केन च संयोगेन जायते। यदा हि मनः व्यवस्थितं भवति तदा पथ्यात्मक एव प्रयोगो भवति। एतेन धातुसाम्यपरम्परा प्रचलति, तेन च स्वास्थ्यसंरक्षणं भवति।**

1. मन के विकास के लिए - योग का अष्टाङ्गत्व निर्दिष्ट किया गया है, केवल आसनों का अभ्यास करने से और केवल प्राणायाम करने से चित्तवृत्ति का निरोध नहीं होता है, अपितु अष्टाङ्ग योग के प्रयोग से ही यह पूर्णरूप से सम्भव है। फिर भी यम, नियम, आसन और प्राणायाम स्वरूपक इन चार के प्रयोग से मन का विकास तो होता ही है। इनसे आहित अर्थों (विषयों) से मनोनिग्रह-स्वरूपक सत्त्वावजय का प्रयास सफल होता है। इस प्रकार करने से रोग नहीं होते हैं।

2. स्वास्थ्यसंरक्षण के लिए- आयुर्वेद में धातुसाम्य का अधिक महत्त्व है। धातुसाम्य तो आहार-विहारों के पथ्यात्मक प्रयोग से ही होता है। यह प्रयोग मनसहित इन्द्रिय का इन्द्रियार्थ के साथ संयोग होने पर होता है। जब मन व्यवस्थित होता है तब पथ्यात्मक ही प्रयोग होता है। इससे धातुसाम्यपरम्परा चलती है और इससे स्वास्थ्य संरक्षण होता है।

**3. रोगनिवारणार्थम्- मनोविकासेन स्वास्थ्य-संरक्षणेन च रोगाणामुत्पत्तिरेव न भवति, यदा हि सत्त्वावजयो न भवति तदा मनसः चञ्चलत्वेनार्थानामनियन्त्रितः प्रयोगो जायते। एतादृग्विधेनासात्म्येन्द्रियार्थ-संयोगेनापथ्यात्मकता जायते तेन च दोषाणामभि-वृद्धितया दोषवैषम्यं धातुप्रदूषणञ्च भवति। विषमतां गताः दोषाः धातूनां प्रदूषणं कृत्वा दोषदूष्यसंमूर्च्छनामाध्यमेन रोगोत्पत्तिं कुर्वन्ति। एतेषां रोगाणां निवारणे योगस्तु परमः सहायको भवति, विशेषेण तु जीर्णरोगाणां निवारणे। योगेन शरीरे रोगप्रतिरोधकक्षमताया अभिवृद्धिर्भवति, अहितेभ्यो ऽर्थेभ्यश्च मनसः निग्रहत्वेनापथ्यपरित्यागे पथ्यसेवने च सामर्थ्यं जायते अनेन च रोगाणां निवारणे सुगमता भवति। योगस्य बह्वयः प्रक्रियाः प्रत्यक्षरूपेण रोगाणां निवारणं कुर्वन्ति। तास्तु भस्त्रिका, नेति-धौति-बस्तीत्याद्याः सन्ति।**

3. रोगनिवारण के लिए - मन के विकास से और स्वास्थ्य संरक्षण से रोगों की उत्पत्ति ही नहीं होती है, जब सत्त्वावजय नहीं होता है तब मन की चञ्चलता से विषयों का अनियन्त्रित प्रयोग होता है। इस प्रकार के असात्म्येन्द्रियार्थ संयोग से अपथ्यात्मकता होती है और उससे दोषों की अभिवृद्धि होने से दोषवैषम्य और धातुप्रदूषण होता है। विषमता को प्राप्त दोष धातुओं का प्रदूषण करके दोष-दूष्य संमूर्च्छना के माध्यम से रोगोत्पत्ति करते हैं। इन रोगों के निवारण में योग तो परम सहायक होता है, विशेष रूप से तो जीर्ण रोगों के निवारण में। योग से शरीर में रोग प्रतिरोधकक्षमता की वृद्धि होती है, अहितकारक विषयों से मन का निग्रह (रोकना) करने से अपथ्य का परित्याग करने में और पथ्य सेवन करने में सामर्थ्य उत्पन्न होता है। इससे रोगों के निवारण में सुगमता होती है। योग की बहुत सी प्रक्रियायें प्रत्यक्ष रूप से रोगों का निवारण करती हैं। वे तो भस्त्रिका, नेति, धौति, बस्ति इत्यादि हैं।

**आचार्यः चरकः निर्दिशति यद्योगो वेदना-निवर्तको भवति। योगेन त्वात्मेन्द्रियमनोऽर्था-नामनारम्भो भवति। प्राथमिकरूपेण ह्येषः अनारम्भः रोगस्वरूपात्मकस्य दुःखस्य निवारको भवति। योगेन प्रारम्भिके काले विषयाणां ग्रहणार्थम् मनसः अनारम्भो भवति। तेन तदनुचितानां शब्दादीनां विषयाणां ग्रहणमेव मनः न करोति। शनैः शनैस्तु यदा मनः स्थिरं भवत्यर्थात् आत्मस्थं भूत्वा स्वस्य स्वतन्त्ररूपेण विषयग्राहिस्वरूपं त्यजति तदा वशित्वं जायते। एषा स्थितिरेव योगरूपेण ज्ञायते, यथा-**

**आत्मेन्द्रियमनोऽर्थानां सन्निकर्षात् प्रवर्तते।**
**सुखदुःखमनारम्भादात्मस्थे मनसि स्थिरे।।**
**निवर्तते तदुभयं वशित्वं चोपजायते।**
**सशरीरस्य योगज्ञास्तं योगमृषयो विदुः।।**

**( च.शा. 1/138-139 )**

आचार्य चरक निर्देश करते हैं कि योग वेदना को दूर करने वाला होता है। योग से तो आत्मा, इन्द्रिय मन और विषयों का अनारम्भ होता है। प्राथमिक रूप से यह अनारम्भ रोगस्वरूपात्मक दु:ख का निवारक होता है। योग से प्रारम्भिक काल में विषयों के ग्रहण के लिए मन का अनारम्भ (कार्य में अप्रवृत्ति) होता है। उससे उन अनुचित शब्दादिविषयों का ग्रहण ही मन नहीं करता है। धीरे-धीरे तो जब मन स्थिर होता है अर्थात् आत्मस्थ होकर अपने स्वतन्त्र रूप से विषयग्राहि-स्वरूप को छोड देता है तब वशित्व (मन का आत्मा में स्थिर होकर वश में हो जाना, आत्म वशी) हो जाता है। यह स्थिति ही योगरूप से जानी जाती है।

आत्मा, इन्द्रिय मन तथा अर्थ (विषयों) के संनिकर्ष (संबन्ध, सामीप्य) से सुख और दु:ख उत्पन्न होते हैं, आत्मा में मन के स्थित होने पर (समाधिस्थ होने पर) अनारम्भ के कारण। (विषय को ग्रहण करने के लिए मन के प्रवृत्त न होने पर) वे दोनों (सुख और दु:ख) निवृत्त हो जाते हैं तब शरीर के साथ आत्मा वशी (स्वेच्छाधीन प्रवृत्ति वाला) हो जाता है। योग को जानने वाले ऋषि उसे योग समझते हैं (कहते हैं)।

**80, सेनापति हाउस के पीछे, प्रेमनगर,**
**झोटवाड़ा, जयपुर**

संस्कृतसमाचाराः

# विद्वत्सम्माननं ग्रन्थलोकार्पणं च

जयपुरे 26 मई दिनाङ्के राजस्थान-संस्कृत-अकादम्या विद्वत्सम्मान-समारोहो ग्रन्थ-लोकार्पण-समारोहश्च समायोज्यत। यत्र 24 विद्वद्वर्याः 2013-14 त आरभ्य 2015-16 वर्ष-पर्यन्तं निर्धारितैः सम्मानैः पुरस्कारैश्च सभाजिताः। डॉ. राजेन्द्रप्रसादभट्टाय मण्डनमिश्रः काव्यपुरस्कारः श्रीकृष्णसोनीवर्याय माघपुरस्कारः, डॉ. शिवसागरत्रिपाठिने शास्त्रपुरस्कारः, डॉ. मीरा द्विवेदिवर्यायै भारतीमिश्रा पुरस्कारः (13-14) आचार्यमिथिलाप्रसादत्रिपाठिने मण्डनमिश्रकाव्य-पुरस्कारः(14-15) डॉ. प्रवीणपंड्यावर्यायाखिल-भारतीयो माघपुरस्कारः, प्रो. श्रीकिशोरमिश्राय डॉ. मण्डनमिश्र-पुरस्कारः, मेवाराम कटारावर्याय अम्बिकादत्तव्यास पुरस्कारः (15-16) समर्पिताः।

डॉ. नन्दकिशोर गौतमाय भट्टमथुरानाथशास्त्रि-साहित्यसम्मानः, पं. जगदीशशर्मणे मधुसूदन ओझा वेद-सम्मानः डॉ. राजेन्द्रप्रसादशर्मणे धर्मशास्त्र-पौराहित्य-सम्मानः (13-14) साँवरमलशर्मणे भट्टमथुरानाथ शास्त्रिसाहित्यसम्मान, पं. रामचन्द्रशर्मणे वीरेश्वरशास्त्रिव्याकरणसम्मानः, गणपतिलालशर्मणे जगन्नाथसम्राट्ज्योतिषसम्मानः, हेमन्त-चतुर्वेदिने मधुसूदनओझा-वेदसम्मानः, सत्यनारायणशास्त्रिणे धर्मशास्त्र पौराहित्य-सम्मानः, धर्मचन्द्रजैनाय गिरिधरशर्मचतुर्वेदिदर्शनसंमानः (14-15), लक्ष्मीनारायण-आसोपावर्याय भट्टमथुरानाथ-शास्त्रिसाहित्यसम्मानः, प्रो. सरोज कौशलवर्यायै संस्कृत-विदुषीसम्मानः, महावीरप्रसादसारस्वताय वीरेश्वर-शास्त्रिव्याकरणसम्मानः, विनोदकुमारशर्मणे जगन्नाथ-सम्राट-ज्योतिषसम्मानः, डॉ. नन्दिता सिंघवीवर्यायै मधुसूदन-ओझा-वेदसम्मानः, मुरारिलालशर्मणे धर्मशास्त्रपौराहित्यसम्मानः, प्रो. बीना अग्रवालवर्यायै गिरिधरशर्मचतुर्वेदिदर्शनसम्मानः (15-16) समर्पिताः।

अस्मिन्नवसरे राजस्थान-राज्यस्य संस्कृतशिक्षा-उच्च-शिक्षामंत्रिणा श्रीकालीचरणसर्राफवर्येण मुख्या-तिथिपदमलंकृतम्। मन्त्रिवर्येण स्वभाषणे राजस्थान-राज्ये संस्कृतस्य संस्कृतशिक्षायाश्च संवर्धनाय क्रिय-माणानां करिष्यमाणानां च कार्याणां परिचयः प्रादायिः।

कलासाहित्यपुरातत्त्वपर्यटनसचिवया श्रीमती रोलीसिंहवर्यया अध्यक्षीयभाषणे संस्कृतोत्थानाय सर्व-कारस्य संकल्पोऽभिव्यञ्जितः। अकादमीनिदेशकवर्यया डॉ. रेणुकाराठौडमहोदयया सूचितं यद्राज्यशासनेन अकादम्याः सदनस्य वीरेश्वरभवनाख्यस्य वेदपरम्परा-प्रातिनिध्य-प्रदर्शभवनरूपेण संवर्धनाय एककोटिमुद्राया अनुदानं घोषितमस्ति। अस्मिन्नवसरे अकादम्या प्रकाशिता व ग्रन्थानां लोकार्पणमपि व्यधायि। स्व. मदनशर्मणा सुधाकरेण लिखितानां शम्भुशतक-चण्डीशतक-वाग्विभूतिपञ्चाशिकानां संकलन-ग्रन्थः आचार्यदयानन्दभार्गवलिखितो दर्शपौर्णमासेष्टि-विज्ञानविवेचको ग्रन्थः, पं. अनन्तशर्मलिखितो 'महाभारतदर्शन-समग्रदृष्टि' ग्रन्थः, प्रो. कमलनयन-शर्मणा लिखितः प्रायश्चित्ताध्यायः, डॉ. अंजनाशर्मा लिखितः ''सर्वसंवादिनी'' ग्रन्थः, पं. अनन्तशर्म-लिखितः 'ऐतिहासिक-कालगणना' (भारतयुद्ध से वर्तमान तक) ग्रन्थः, आ दयानन्दभार्गवस्य अभिनव-वेदपाठमाला ग्रन्थः, देवर्षिकलानाथशास्त्रिलिखित आंङ्गलभाषाग्रन्थः ''द होराइजन्स ऑफ संस्कृत-विथ स्पेशल, फोक्स ऑन राजस्थान'' शीर्षकवहः इत्येवमष्टौ ग्रन्था अकादम्या प्रकाशिता लोकायार्पिताः।

आ. दयानन्दभार्गवेण, देवर्षिकलानाथशास्त्रिणा, पं. अनन्तशर्मणा चास्मिन्नवसरे स्वविचारा अपि प्रकटिताः।

प्रेषण–प्रत्येक माह की ५ तारीख सी.एस.ओ. गांधीनगर, जयपुर
पंजीयन क्रमांक (भारत) आर. एन. आई. ३७५८–५७

डाक पंजीयन
Jaipur City/429/2015-17

हार्दिक शुभकामनाओं सहित :-

# ए इन्फ्रास्ट्रक्चर लिमिटेड

निर्माता

## ए.सी. प्रेशर पाइप्स

तकनीकी रूप से सर्वोत्तम, पेयजल, कृषि, सीवरेज एवम् सेनिटेशन में उपयोगी
तथा धातु निर्मित पाइपों की अपेक्षा सस्ते और टिकाऊ
फाइबर सीमेंट की नालीदार चादरें

## छत्त एक, लाभ अनेक

हमीरगढ़ भीलवाड़ा - 311025 (राजस्थान) दूरभाषः 01482-286106/07
दिल्ली कार्यालयः ए-9, ग्रीन पार्क मैन, नई दिल्ली-110016 दूरभाषः- 011-26850488
जयपुर पाइप कार्यालय : 411, तीसरी मंजिल, शालीमार काम्प्लेक्स, चर्च रोड़, एम.आई.रोड़, जयपुर
फोनः 0141-2369691, 2370566, फैक्स : 0141-4019691
जयपुर चादरें कार्यालयः शोरूम नं. 2, फर्स्ट फ्लोर, नियर रिद्धी-सिद्धी स्वीट्स, लिंक रोड़, गोपालपुरा, जयपुर
फोन : 0141-3206915, फैक्सः- 0141-2763656

## राष्ट्रीय विचारों के लिए पढ़ें

# पाञ्चजन्य Organiser

हमारी विशेषताएं

- राष्ट्रीय दृष्टिकोण
- 6 दशकों से लगातार प्रकाशित
- संसद तथा विधान सभाओं को गुंजायमान करने वाला पत्र
- विश्वसनीय प्रतिष्ठित दायित्वपूर्ण पत्रकारिता
- हजारों शैक्षिक, व्यावसायिक प्रतिष्ठानों एवं पुस्तकालयों में पहुंच
- ई–पेपर की सुविधा

You can subscribe **Panchjanya/Organiser** Weeklies Online
through our **Websites: www.panchjanya.com, www.organiser.org**

**ग्राहक शुल्क भारत में : वार्षिक शुल्क रु. 625/- एवं द्विवार्षिक रु. 1100/-**
विदेशों में (हवाई डाक द्वारा) : वार्षिक शुल्क ... $ 60
**Reach millions of consumers through our weeklies**

## भारत प्रकाशन (दिल्ली) लि.

2322, लक्ष्मीनारायण स्ट्रीट, पहाड़गंज, नई दिल्ली-11005 www.organiser.org & www.panchjanya.com
दूरभाषः 011-47642000 से 30 फैक्सः 011-47642015 E-mail: circ@pbdl.in

स्वत्वाधिकारी–भारतीयसंस्कृतप्रचारसंस्थानम्, राजस्थानम् दूरभाषः २३७९०१४ प्रकाशको मुद्रकश्च माणकचन्द माहेश्वरी द्वारा न्यू जय शिवा प्रिन्टर्स, गोपालबाड़ी, जयपुरम् दूरभाषः २३६५७२१ पत्रसंकेतः– भारतीभवनम्, बी–१५ न्यू कॉलोनी, जयपुरम्–३०२ ००१ भारतीयसंस्कृतप्रचार संस्थानस्य अध्यक्षः शंकर प्रसाद शुक्लः

प्रतिष्ठायाम्,